CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 952

Title Vyutpattivāda.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 952 Subject: N.-Vaiśeṣika

Title: Vyutpattivāda.

Author: Gadādhara Scribe: -

Date of the work: - Date of the Ms.: -

Place of the work: - Place of the Ms.: -

Size: 11 by 4.8" Extent: 133 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

निरूपणलक्षणाः काश्चित्सामर्थ्यादभिधानवत् ॥ क्रियते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः
अप्येकदंत हेरंब लंबोदर गजानन ॥ अत्र निरूपणलक्षणा यथा हेरंबपदं हेरं व. प. [illegible] लाभ्यते नतु हेरंबादि
पदार्थे तेन [illegible] सिद्धिरितिरूढाभिसंधिः

यानि करणप्रकारस्तु अग्निरंशैः पारिभाषिकैः समचतुरस्रं कृ[illegible] मध्ये पूर्वापरं दक्षिणोत्तरं
चेति सूत्रद्वयपातेन चतुष्कोष्ठं कृत्वा तत्र प्रत्येकं [illegible] प्रत्येकं कोणात् [illegible] दत्वा तत्र [illegible]
संपातात् कोणसूत्रव्यासार्धेन प्राग्दक्षिणरेखा [illegible] विधाय पूर्वाप
रे [illegible] चतुरस्रं पुरस्तात् [illegible] दक्षिणे [illegible] रेखा[illegible]
पदचतु[illegible] यथोत्तरं च [illegible] एवंरूप

कु॰ वा॰

॥१॥ श्रीगणेशायनमः॥ शाब्दबोधे चैकपदार्थे परपदार्थस्य संसर्गः संसर्गमर्यादया भासते स च क्वाचि
दभेदः क्वाचित्तदतिरिक्तस्तत्राधाराधेयभावो योग्यतानुयोगिविषयविषयिभावादिः॥ अभेदश्च प्राति
पदिकार्थे स्वस्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गम
र्यादया भासते यथा नीलो घटः नीलघटमानयेत्यादौ घटादौ नीलादेः ननु विरुद्धविभक्तौ नत्किम
पदार्थस्य नीलस्य घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्॥ स्वसमान
ती विभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वं साजात्यं चात्र विभक्तिविभाजकप्रथमात्वा
दिना ननु समानानुपूर्वीकत्वं साजात्यं वेदाः प्रमाणं शतं ब्राह्मणा इत्यादावन्वयबोधानुपपत्तेः॥
ननु यथेष्टं साघ्याः सदैवतत्त्वमित्यनुशासनात् शतं ब्राह्मणा इत्यादेः साधुत्वेपि वेदाः प्रमाणमित्या
दयः कथं प्रयोगाः॥ विशेष्यविशेषणवाचकपदयोरसति विशेषानुशासने समानवच
नकत्वनियमात्॥ अन्यथा घटः नीलइत्यादेरपि साधुताप्रसंगात्॥ समानलिंगकस्थले तथा
नियमोपगमेन वेदाः प्रमाणमित्यादेः साधुत्वोपपादनेपि इति हेतुस्तनैव [?] इति कारिकायाः शाव॰
इति त्रयः समुदिता हेतुरिति काव्यप्रकाशव्याख्यायाम् असंगतिर्दुर्वारैव॥ एवमसमानलिंग ॥१॥
कस्थले विशेष्यवाचकपदसमानवचनस्यैव विशेषणपदस्य साधुत्वे तादृशस्थले ओस

र्थिकमेकवचनमेव सर्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति प्रत्यक्षानुमानोपमानशब्दाः प्र
माणानीत्यादिवत्तादृशादेरप्यनुपपत्तिः॥ मैवं॥ यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य
विषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वनियमः॥
अत एव पुरूरवोमाद्रवसौ विश्वेदेवा इत्यादौ द्वित्वावच्छिन्नयोः पुरूरवोमाद्रवयोः प्रत्येकं विशेषणतया विशेष्य
विवक्षितत्वात् तद्वाचकपदस्य द्विवचनांतता॥ वेदाः प्रमाणमित्यत्र च विशेषणपदोत्तरविभक्त्यर्थ
त्वविकल्पमेकत्वं विवक्षितं तत्र प्रकृत्यर्थतावच्छेदकप्रमितिकरणत्वेऽन्वेति शाब्दप्रमाकरणत्व वेदांप्रनाम [?]
चशब्दत्वावच्छिन्नयावत्स्वद्धनिष्ठमेकमेवेति नायोग्यता॥ न च पदार्थः पदार्थेनान्वेतीति व्युत्पत्ति
विरोधः॥ संपन्नो व्रीहिरित्यनेकव्रीहितात्पर्येप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्या
वश्यकत्वात्॥ यद्यप्यत्र स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थ एवैकत्वान्वयः व्रीहि
त्वादिजातेः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतयाऽन्वयितावच्छेदकरूपेणानुपस्थि
तेस्तत्र पदार्थांतरस्यान्वयानुपपत्तेरिति मन्यते तदा प्रकृतेपीदृशैव गतिः॥ यत्तु संपन्नो व्रीहिरित्या
देरेकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नानाव्रीहिष्वन्वीयंते इत्युक्तौ च सामंजस्यं जातेरे

मु॰ पा॰ ॥२॥

त्वभानोपगमो निरर्थक इति तदसत्। यतः स्वसजातीयानिष्ठभेदप्रतियोगितानवच्छेदकैकत्व
रूपसजातीयाद्वितीयरहितत्वमेकवचनार्थः न त्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्येनार्थ
तरवत्त्वाभावात्। अनुपयोगाच्च। अत एव पशुना यजेतेत्यादौ पशुनिष्ठतादृशैकत्वस्याविवक्षितत्वा
दनेकपशुकरणकयागान्नादृष्टसिद्धिः। साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट
प्रकृत्यर्थतावच्छेदकरूपेण अतोऽत्र घटोऽस्तीत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्याप्र
सिद्धत्वेऽपि न क्षतिः। एतद्देशाविद्यमानघटानिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैव तत्र — अत्र घटोऽस्ती
बोधात् तस्य च प्रसिद्धत्वात्। एतद्देशे बहुघटसत्त्वदशायां तादृशवाक्यप्रयोगस्तु जात्येकत्वाद्
दिवसमर्थनीयः॥ यत्तु एकत्वाविवक्षायामपि भावाख्यातस्थले एकवचनस्य साधुत्वदर्शनात्संख्यो
या अविवक्षणेऽपि संपन्नो ब्रीहिरित्यादावेकवचनोपपत्तेरत्रैकत्वपरतया तत्र समर्थनेनेति तद्
त्वं किंचित्करं। भावाख्यातस्थले गत्यंतरविरहेण विभक्तेर्निरर्थकत्वोपगमात् अत्र सार्थकत्वो — टि॰ प॰
पगमसंभवे तत्परित्यागस्यानुचितत्वात्। सा तात्पर्यतद्बोधस्यानुभविकत्वाच्चेति॥ एवं त्रयः — ॥२॥
समुदिता हेतुरित्यत्र हेतुपदं पर्याप्त्या प्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं तादृशसमु

(भावप्रत्ययस्थले ह्वरत्ते नृसुप्त तङ्गत्यात्र भूसत्त्व संयोगात्मकस्य धात्वर्थव्यापारस्य मनोयोगात्मककर्माकांक्षाविरहे एवं आत्मनेपदार्थः
(फलं न भासते अकर्मकोऽसौ भावे मत्प्रत्ययस्य विधानादिति। तथा च ह्ववरुद्ध जवेत्तिक तिसन्यः स्यापदं त्वं न ब:)

शेष:

दायत्वान्वितमेकत्वमेकवचनार्थः अत एव यत्रात्यादीनां त्रयाणां तृणारणिमणीनां न्यायेन हेतुत्वं तत्र
कार्यानिरासः। तथा सर्वेषामेवैकसमवधानदशायामपि कार्योत्पत्तेरावश्यकतया तात्पर्यपर्या — पा॰
प्तसमुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथाविधैकसमुदायत्वा
श्रयत्वानुपपत्तेः। एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्र त्रितयानिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैक
त्वं विवक्षितमिति तत्रावशेष्यपदस्य बहुवचनांतत्वेऽपि विशेषणपदस्यैकवचनांतता संगतिः। प्रत्यक्षा
नुमानेत्यादिसूत्रे प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्य प्रत्यक्षानुमानादिनिष्ठस्यैकतया बाधि
तत्वेन प्रमाणपदस्य बहुवचनांतता। एवं पितरो देवता इत्यत्रापि पितृपितामहादीनां सहितानां — अ॰ विवक्षितत्वे
एकरूपेण देवतात्वविरहेण पितृत्वपितामहत्वादिना पृथगेव यागोद्देश्यत्वरूपदेवतात्वादुद्देश्य
तावच्छेदकभेदेन बोद्धव्यताभेदात् एकत्वस्याविवक्षया देवतापदस्य बहुवचनांततेति दिक्॥ स्व
प्रकृतिकत्वं च स्वाव्यवहितोत्तरत्वेन प्रतिसंधीयमानत्वं तेन दधि सुंदरमित्यादौ विशेष्यपदानंतरं
विभक्तेरसत्त्वेऽपि न क्षतिः तत्राविभक्तेरनुसंधानं विना शाब्दबोधानभ्युपगमात्। एवं तादृशविभक्ति
सजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वं तेन भेदंर

तत्र वि
वि

व्यु० वा०
१३॥

धीत्यादौ विशेषणपदानंतरं विभक्तेरसत्वोपपत्तिः। अथ नीलस्य घट इत्यादावपि पदार्थोपस्थि
त्यादिकारणसमवधानसंभवात् तेन नील घटयोरभेदान्वयबोधः सामग्र्याः कार्यजनकत्वे
नावश्यनियमभंगप्रसंगरूपप्रयोजनक्षतेरकिंचित्करत्वादिति चेत्॥ तथाविधान्वयबोधौ
पयिकाकांक्षाविरहेण। तथाहि तादृशान्वयबोधे प्रथमाविभक्त्यंत घटादिपदसमभिव्या
हृतप्रथमांतनीलादिपदत्वमेव समस्तनील घटपदयोराकांक्षा। समासस्थले च घटपदाव्य
वहितपूर्ववर्त्ति नीलपदत्वं नीलपदाव्यवहितोत्तरवर्त्ति घटादिपदत्वं चाकांक्षा उक्तस्थले
च तादृश्या एकस्या अप्याकांक्षाया विरहान्नापत्तिः। कार्यतावच्छेदककोटावव्यवहितोत्तरत्व
निवेशान्नोक्ताकांक्षाज्ञानयोः परस्पर बोधे व्यभिचारः। यत्तु समासव्याससाधारणं
विशेषणपदस्य विशेष्यवाचकपदाप्रकृतिक विभक्त्यप्रकृतित्वरूपं विरुद्धविभक्तिराहित्यमे
व तादृशान्वयबोधौपयिकाकांक्षा। विशेष्यवाचकपदनिष्ठ विशेषणवाचकपदाप्रकृति
कविभक्त्यप्रकृतित्वं च न तथा नीलघटमानयेत्यादावसंभवादिति तदसत्। विशेष्यवाचक
पदाप्रकृतिकत्वस्य तादृशपदानुत्तरत्वस्य च दुरुत्वेनाप्रतिसंधीयमानत्वरूपस्य वा नीलो

३

विशेष्यवाचकपदोत्तर विभक्त्यन्तत्वमित्यर्थः। तेन नीलो घट इत्यादौ विशेषणत्वमतादृशधर्मवद्विभक्तिराहित्यमाकांक्षा दोषः॥२

घट इत्यादौ नीलादिपदसमभिव्याहृतविभक्तौ घटपदसमभिव्याहृतविभक्तिभिन्नत्वाय सत्वात्।
थ विशेष्यवाचकपदोत्तर वृत्तिविभक्तिविभाजक धर्मवद्विभक्तिराहित्यस्य विवक्षणान्न दोष इति — भिन्नत्वं
चेत्। तर्हि विभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञानसंभवाच्छाब्दबोधानुत्पत्तिः। नीलो
घट इत्यादौ सुपदस्याप्रवृत्त्यभ्रमदशायां तादृशाशाब्दबोधानुदयात् नीलस्य घट इत्यादावपि षष्ठ्या
दिः सुत्वादिभ्रमदशायां शाब्दबोधोत्पत्त्या स्वरूपतो विरुद्धविभक्तिराहित्यस्याप्रयोजकत्वात्। अथ
नीलो घटः नील घट इत्यादिद्विविधबोधसाधारणं स्वोत्तरत्वादिभिन्नपदानुत्तरत्वविशिष्टस्वोत्तरत्व — स्वपदं विशेष्यपदं॥
दिरूपस्याव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्त्वावच्छिन्न घटादिपदत्वमेव तथास्त्विति चेत् न।
नीलरहितेन घट रूपार्थेन कर्म धारये दूषणम् ध्यं — नील घटरूपौ भिन्नावित्यादि वाक्यसाधारण्यानुरोधेनान्यादृश्या एवाकांक्षाया उपगंतव्यतया उपदर्शि
तव्याससमाससाधारणानुगताकांक्षानुसरणस्याप्रयोजकत्वात्। अथ नीलं घटमानयेत्यादौ
नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेत् न
कुत्रापि। विभक्तिः पदसाधुत्वार्थमेव प्रयुज्यते। अभेद एव वा विशेषणविभक्तेरर्थः। अभेदसंस
र्गता या भानं तु समासस्थल एव तत्र विभक्त्यनुसंधानं विनापि शाब्दबुद्धेरनुभवसिद्धत्वादिस

समासस्थले ५

प्रतियोगिताकत्वसंबंधेन भेदः ॥ शिवा ॥

पु॰ ग्रा॰ ॥४॥ ऽघटः ॥ अथैतन्मते भेदेयादि भेदत्वावच्छिन्नाभावस्तदाप्रसिद्धः यादृशभेदप्रतियोगिकाभा
वस्तदा नीलं जलमित्यादिवाक्यस्य प्रामाण्यापत्तिः जले हि यादि नानीलभेदाभावसत्त्वात् नी
लभेदत्वाद्यवच्छिन्नाभावस्याविभक्त्यर्थत्वे नीलादिपदार्थानन्वयप्रसंगः न च भेदप्रतियोगि
काभाव एव विभक्त्यर्थः नीलादिपदसमभिव्याहारात् नीलभेदत्वावच्छिन्नाभावः प्रतीयत इति वाच्यं
पदार्थद्वयसंसर्गतानुस्येवाकांक्षानयमनस्यात् नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वेनैव तत्
विना भेदरूपपदार्थतावच्छेदकस्याभावेनाद्धासंबधभानासंभवात् मैवं ॥ भेदाऽभावश्च वि
शेषणविभक्त्यर्थः विनाऽच्छिन्नानस्तु आकांक्षादिवशात् एतेन भेदे नीलादिपदार्थान्वये तत्कदेशा
न्वयप्रसंगइत्यपि निरस्तं । न च विशेषणविभक्तेरभेदार्थकत्वे नीलं घट इत्यादावपि अभेदान्वयबो
धापत्तिः धात्वेन घन धानस्यादौ तत्तीयया अभेदबोधानात् अभेदप्रकारकबोधे च विरुद्धविभ
गा क्तिराहित्यानपेक्षेति वाच्यं ॥ द्वितीयादिना अभेदबोधने द्वितीयांतविशेष्यवाचकपदस शिव॰
मभिव्याहारस्य प्रयोजकत्वाभ्युपगमात् । अथ प्रमेयो घट इत्यादौ प्रमेयत्वावच्छिन्नभेदाप्र ॥४॥
सिध्या लघुधर्मसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे कंबुग्रीवादिमा

नीलत्वविशिष्ट [redacted] नीलस्य नीलघटघटितत्वेनोद्देश्यतावच्छेदकविधेयाप्रसिद्धमत एव नीलत्व
त्वस्य नीलान्वयसंभवेन नीलत्वादिविशिष्टस्य स्वघटितत्वेन नीलत्वेऽन्वये आकांक्षाविरहादित्यर्थः

न्यघट इत्यादावपि कंबुग्रीवादिमत्त्वावच्छिन्नभेदाप्रसिद्ध्या विशेषणविभक्तेरभेदार्थकत्वासंभवः ॥
एवं नीलपदोत्तरपदघटितस्य नीलो घट इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः नीलत्वादि
घटादि नाभेदाभावस्य नीलघटादौ सत्त्वात् । एतेन विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिमेकं वा वि
शेषणविभक्तेरर्थः नीलत्वादे नीलत्वाद्यवच्छिन्नभेदाभावरूपतया भेदार्थकत्वप्रवादोप
पत्तिरिति परास्तं । नीलत्वादौ नीलत्वादिमतः स्ववृत्तित्वसंबंधेनान्वये आकांक्षाविरहाच्च । य
थाहि तादात्म्याद्यधिकरणेऽधिकरणतया तदन्वयोऽनुभवविरुद्धस्तथा तद्धर्मे आधेयतया तद्ध
वि॰उक् र्मवदन्वयोऽपि । अत एव च कर्मेण गच्छतीत्यादिवाक्यस्य निराकांक्षता । न चैवं संसर्गतामते प्यनि
स्तारः नीलो घट इत्यादौ स्ववृत्तिनीलत्वादेः संसर्गतास्वीकारेऽपि स्वघटे प्रामाण्यापत्तेर्दुर्वारत्वा
दिति वाच्यं । स्ववृत्तिनीलत्वादेः स्वस्मिन्नेव संबंधतोपगमेन परापादितस्य नीलत्वादेः घटादौ संबं
प्र धतावच्छेदकत्वाद्यतिप्रसंगाभावात् । वस्तुतस्तु तत्तद्घटत्वावच्छिन्नभेदाभाव एव नीलत्वादि
प्रकारेण भासमानानां तत्तद्घटीनां स्वास्मिन् संबंधतया भासत इति न कोप्यनुपपत्तिः संबंध
नील॰ [illegible] तस्य भेदप्रतियोगिकाभावत्वेन तत्तद्घटभेदप्रतियोगिकाभावत्वेनैव संबंधत्वे तदा न

पु॰ ॥५॥ ...षाद्योजक्तव्यभक्तेर्भेदार्थकत्वमते पि तत्तद्व्यक्तित्वावच्छिन्नाभेद एव विभक्त्यर्थो वक्तव्य
इति वाच्यं। तथा सत्यपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य कथंचिदपि भानासंभवेन तदवच्छिन्नभेदा
भावे वास्ति ग्रहासंभवेनापूर्वव्यक्तौ नामभेदान्वयबोधानुपपत्तेः। संसर्गतानवच्छेदकविशिष्ट
बुद्ध्यायहेतुत्वेनानुपस्थितस्यापि संसर्गतया भानसंभवे न संसर्गतामतेऽनुपपत्त्यभावात्।
न चाविभक्त्यर्थे पि भेदे तत्तद्व्यक्ति[illegible]त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन वनीलत्वादिना
तत्तद्घटादीनामन्वयः तादृशभेदानामपि तत्तद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकत्वसंबंधे
न वस्तीनत्वावच्छिन्नाभावेऽन्वय उपेयते तावतैव तत्तद्व्यक्तित्वावच्छिन्नाभेदत्वाभ्युपगमे तेन काप्यनु
पपत्तिरिति वाच्यं। विशेषणतावच्छेदकावच्छिन्नाया एव प्रतियोगितायाः अभावे प्रतियो
गिनः संबंधतया भानात् अन्यथा विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेः प्रतियोगिविशेषित
भावज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेते इति दर्शनात् केवलं विशेष्ये विशेषण
मिति रीत्या न काप्यभ्युपेतीति चेत् सत्यं। अभेदस्तादात्म्यं तत्स्वरूपत्वमसाधारणो धर्मः शि॰प॰ ॥५॥
तद्व्यक्ति वे॰ साधारणं चैकमात्रवृत्तित्वं तत्र स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसंबं
बुद्धि न पुनस्तदानेन प्रतियोगिविशेषितानावबुद्ध्य प्रतियोगिप्रकारीभूतधर्मविशिष्टवैशिष्ट्यावगाहितमानीलेत्याहि नानीलादिविशेषितानावनीलत्वाद्य
वच्छिन्नप्रतियोगिनानिरूपितानुयोगितारूपनीलत्वविशिष्टनिरूपितवैशिष्ट्यस्य वभानात् ५) स्वपदं घटादिभेदपरं।

साधारणो धर्मः

येन भेदविशेषं वैलक्षण्यमनन्यत्वाम्येकमात्रवृत्तिधर्म एव विशेषणविभक्त्यर्थः इति भवति तत्र प्रकृ
त्यर्थस्य संसर्गमर्यादया भासते तादृशश्च धर्मस्तत्तद्व्यक्तित्वादिरूप एव अपूर्वव्यक्तिनिष्ठ
स्य तादृशधर्मस्याविशिष्टत्वानुमरा[illegible]प्येकमात्रवृत्तिधर्मत्वादि सामान्यप्रत्यासत्त्या
ग्रहत्वमेव। अभेदस्य संसर्गतामते प्ये तादृशानुगताभेदस्यैव तथात्वमुच्यते। तत्तद्व्यक्ति
न्ते त्वावच्छिन्नभेदत्वाभावकूटस्याविशिष्यतया घटो न नीलत्वादि वाक्यजन्यबोधे प्रतियोग्यभा
वान्वयो[illegible]तुल्ययोगक्षेमावतिन्यायेन तादृशाननुगतसंबंधावच्छिन्नप्रतियोगिताका
ननुगताभावविषयीक्रियेरन् ननु नीलादिवृत्तिप्रतियोगिताकोऽभावः तथा सति यत्किं
चित्तादृशाभावतात्पर्येण प्रयुक्तस्य नीलोऽपि न नीलत्वमिति वाक्यस्याप्रामाण्यं स्यात् इदं तु
ध्यं विशेषणविभक्तेर्भेदार्थकत्वे घटो न नीलत्वादौ नञा नीलाद्यभेदाभाव एव प्रति
पाद्यते न तु नीलादिभेदः यादृशसमभिव्याहारस्थले येन संबंधेन यत्र धर्मिणि येन रूपेण
यद्वत्त्वं न ञ्समस्त्वे प्रतीयते तादृशस्थले नञा तत्र धर्मिणि तादृशसंबंधावच्छिन्नप्रतियो
गिताकाभावबोधस्य व्युत्पत्तिसिद्धत्वात् प्रतियोग्यभावान्वयाधिकारे स्पष्टमेवार्थः॥

भा॰४

॥ नंगीकारे कर्मधारयसमासो न स्यात् इति भावः ।१ एवोद्ध्वनपा... याज्ञ... ५

व्यु० धा० ॥६॥

एवं च नञो भेदबोधकत्वं कुत्रापि न संभवति। अनीलघटमानयेत्यादौ घटपदसामानाधिकरण्या-
नुरोधेनानीलपदस्य नीलभिन्नपरतया नञो भेदार्थकत्वं लक्षणया उपगन्तव्यत्वात्। इदं तत्राधेय-
अभेदस्य प्रकारतामतेपि घटो न नील इत्यादिवाक्यस्य नीलाभेदाभावबोधकत्वेपि तृतीयाभाव-
स्य प्रतियोगिरूपतया नञो भेदबोधकत्वेनानुपपन्नं परं तु भेदत्वप्रकारकबोधो भवति न वेत्यन्य-
नता। इदं तु तत्त्वं। असमासस्थले भेदस्य संसर्गतोपगमेपि गौरवपरिहारात्तत्र विशेषणविभक्ते-
र्निकल्पनमनुचितं। न चाभेदे नञो विशेषणविभक्तेः शक्तिभ्रमः स्यात् रसिकलक्षणाग्रहे वात
न सर्वमत एवाभेदप्रकारकबोधस्य नीलो घट इत्यादिवाक्यादुत्पत्त्या तादृशसमभिव्याहारज्ञा-
नस्याद्विविधबोधे हेतुताद्वयं कल्पनीयम् भेदस्य संसर्गतावादिनेति गौरवं एवं तादृशसमभि-
व्याहारज्ञानघटितसामग्र्या भिन्नाभिन्नयोग्यताज्ञानघटिततया द्वैविध्येनाभिन्नविषयक-
व्याहारज्ञानघटितसामग्रीप्रतिबन्धकताया अप्याधिक्यमिति ध्येयं। अभेदस्य संस-
प्रसक्तादिकं प्रति तादृशज्ञानाद् सामग्रीप्रतिबन्धकतायामादितादृशः स्तोकं पचति मृदु पचतीत्यादिसं-
र्गताधादनेतत्स्थलेपि तत्संसर्गकबोधस्यैवोपगमादिति ध्येयं। पाकादावभेदान्वयोपु-
दोषकृद्धचिभक्त्यर्थकद्वपदोपस्थापितस्यापि स्तोकमृद्वादेर्धात्वर्थ...

८३

शिव० ॥६॥

त्पत्तिसिद्धः तदनुरोधेन चाद्वितीयान्तपदधातुपदसमभिव्याहारस्याप्यभेदान्वयबोधोपायका-
काङ्क्षात्वमुपगम्यते॥ क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिकल्पना क्रियाविशेष-
णानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात्। न चैवं स्तोकः पाकः इत्यादावपि द्वितीयाप्रस-
ङ्गः तत्रापि स्तोकादेः क्रियासामान्यविशेषणत्वात् भावकृत्प्रयोगसाधुत्वमात्रार्थकतया धातु-
नैव तत्र पाकादिप्रतिपादनादिति वाच्यं॥ क्रियापदस्य तत्र सार्थकप्रत्ययान्तधातूपस्थाप्यार्थप-
रत्वात्। स्तोकं स्थीयत इत्यादावाख्यातस्यापि वर्त्तमानत्वाद्यर्थकतया सार्थकत्वात्। न च वर्त्तमा-
नत्वाद्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यं। वर्त्तमानत्वाद्यविवक्षास्थले इष्टार्थबोधप्रयो-
जकाकाङ्क्षाविरहकाले नैव तदा विवक्षास्थलेपि भावाख्यातस्यार्थवत्त्वात् केचित्तु धातोरिव घञ-
न्तस्यापि पाकादौ शक्तिरूपेयते अन्यथा सुब्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुप-
पत्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेः धातूनां सुब्विभक्तिप्रकृतित्वा-
त् प्रत्ययेऽकृदन्तानां योपि प्रत्ययार्थान्वयोपगमे पचन्तं पश्यतीत्यादितः पच्यमानं पश्यतीत्यादितश्च
अकर्तौ द्वितीयाद्यर्थकर्मत्वाद्यन्वयप्रसङ्गात्। एकविशेषणत्वेनान्वितस्यान्यत्र विशेषण-

॥७॥ [..]ाम्नत[..]न्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नत्वेन तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्मत्वे
विशेषणतयाऽन्वय इति चेत् तथापि पाकादिविशेषणतया सुबर्थसंख्यान्वयसंभवात् यत्र
पाककर्त्रादिर्द्वित्वादिकं बाधितं पाकादेरनतत्वबाधितं तत्र पचंतौ पश्यति पचमानौ पश्यती
त्यादिप्रयोगप्रसंगस्य दुर्वारत्वात् धातूपस्थाप्यार्थे सुबर्थान्वयबोधं प्रति तत्तद्धातूत्तरप्रत्यय
धर्मिककिंचिदर्थपरत्वेज्ञानस्य प्रतिबंधकतामुपगम्यैतादृशातिप्रसंगवारणे च गौरवात्
एवं शोभनं पचनमित्यादौ धातुमात्रेण पाकाद्युपस्थितौ शोभनादेरभेदान्वयबोधानुपप
स त्तिः विशेषणविभक्तिंजातीयविभक्तिप्रकृत्यनुपस्थाप्यत्वात् प्रकृत्येकदेशासाधारणता
दृशविभक्तिप्रकृतिजन्यप्रयोजकत्वे तत्र नमुडादेरधिकरणतापरत्वेपि तथाविधान्वयबोधा
पत्तेः कस्यचित् प्रतिबंधकताकल्पनस्य धिलात्तद्वारणे च गौरवात् न चैवमुपकुंभार्द्धपिप्पल्या
दिरूपपूर्वपदार्थप्रधानसमासपदात् कुंभसमीपार्द्धपिप्पल्यादौ विभक्त्यर्थान्वयस्य प्रातिप शि॰अ॰
दिकार्थांतराभेदान्वयस्य चानुपपत्तिः पूर्वपदस्य समासोत्तरायत्तत्वप्रकृतित्वादिति वाच्यं एत ॥७॥
दनुरोधेनैव तत्र कुंभाद्यर्द्धपिप्पल्यादिपदानामेव कुंभसमीपार्द्धपिप्पल्यादौ लक्षणायाः पूर्वपदस्य

तादृशसमस्तपदप्रत्ययपदयोरव्यवहितपूर्वापरीभावो व्याकांक्षा एवं तत्र प्रातिपदिकांत

अधिकरणमनुजं तस्यावेपितादृशबोधापत्तिरिति भावः ५ विभक्त्यादिरूपस्य [..] ५ शाभत

९ कुंभ तात्पर्यग्रहमात्रोपयोगिताया अभ्युपगमात् वस्तुतस्तु तत्रोत्तरपदार्थविशेषितपूर्वपदार्थस
मीपार्द्धादौ प्रत्ययार्थान्वयबोधे समानविभक्तिकयोस्तादृशासमस्तपदपदांतरयोश्च समभिव्या
हारोप्याकांक्षा तथा सति प्रसंगाविरहात् धात्वर्थे पाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिकां
तरार्थाभेदान्वयबोधे च नमुडंतधात्वाद्यंतसमुदायप्रत्ययोरव्यवहितपूर्वापरीभावस्य समान
विभक्तिकयोस्तादृशासमुदायपदपदांतरयोः समभिव्याहारस्य चाकांक्षात्वोपगमे तु दर्शिता
ति प्रसंगस्य दुर्वारत्वात् न तत्संभवः अथ धात्वाद्यंतसमुदायस्य पाकाद्यर्थकत्वे धात्वाद्यंतसमु
दायस्य संयोगत्वविभागत्वविशिष्टवाचकत्वं व्युत्पाद्य संयोगविभागादिपदानां नैमित्तिकसं
रूपसंबंधे ज्ञात्वानिराकरणौचित्यमिति कुतोचित तेतोतिरेकात्तिः नहि कस्यापि कुंभ [..] तोपरीतलिंग
नं युक्तिबलादुपस्थितसिद्धो बाधकं एवं च यत्र धातुमात्रस्य पाकादौ तात्पर्यं तत्र तद्विशेषणवाच
त कपदांद्वितीयैव यत्र तु कृदंतसमुदायस्य पाकौ तात्पर्यं तत्र तादृशपदं तथाविधकृदंतसमुदा
यसमानविभक्तिकमेव तदुक्तं कातंत्रपरिशिष्टकृता ॥ यथा स्तोकः पाकः कृदंतविशेषणस्य तु व
[..]ेवाधिकरणत्वे तु स्तोकमोदनस्य पाकरतिदेवेति दिति तदर्थबोधकपदेन [..]

[..] यदसाहचर्याद्दानान्वयबोधप्रयुक्ता [..] संयोगत्वादिरूपसंबन्धवाचकत्वे नैमित्तिके (के) ५
[..]नस्याति ५

राज पुरुष ... बोधो आपत्ते समासबोधः राज्ञः पुरुषः इत्यत्र स्यात्

शु०बा० ॥१२॥ पुरुषोऽस्ति राजादिपदोत्तरङस्पदत्वरूपानुपूर्वीविशेषरूपाकांक्षाया अपि प्रयोजकत्वात् ...बोधे
तत्र शास्त्रत्वमेवेति वाच्यं। संबंधादिविशेष्यकराजादिप्रकारकान्वयबोधे एवं तादृशाकांक्षात्
स्य हेतुतया पुरुषादौ राजादिपदार्थप्रकारकान्वयबोधोत्पत्तौ तादृशाकांक्षाज्ञानरूपकारणविरहस्यैव नि
यामकत्वात्। अत्र केचित्। नामार्थप्रकारकभेदान्वयबोधं प्रति समानविशेष्यत्वसंबंधेन प्रत्ययजन्यो प
पस्थितेर्हेतुत्वकल्पनेन नामार्थप्रकारकभेदान्वयबोधविशेष्यतया प्रत्ययार्थस्यैव भानं न नामा
र्थस्य तत्र विशेष्यतासंबंधेन प्रत्ययजन्योपस्थितेरभावात्। न च संबंधादेरपि नामार्थतया तत्प्र
समासस्य कारकान्वयबोधे पुरुषादिपदार्थस्य विशेष्यतया भानानुपपत्तिः। तत्तन्नामपदजन्यतत्तन्नामार्थ मा
प्रकारकशाब्दबोधत्वावच्छिन्नं प्रति प्रत्ययजन्योपस्थितित्वेन हेतुत्वेपि राजसंबंधः प्रमेयः राज्ञः
पुरुष इत्येतादृशवाक्यद्वयजन्यवाक्यार्थद्वयबोधे पुरुषस्य राजसंबंधविशेष्यतया भानानुप प
पत्तिरिति वाच्यं। प्रत्ययाधीनतत्तत्पदार्थोपस्थितिजन्यतत्तदर्थप्रकारकशाब्दबोधत्वावच्छिन्नं शि०५०
प्रत्येव प्रत्ययजन्योपस्थितेः समानविशेष्यतासंबंधेन हेतुत्वोपगमात्। अथैवमपि यत्र रा ॥१२॥
जपुरुष इत्यत्र पुरुषपदाधीनपुरुषोपस्थितौ प्रत्ययविशेषाद्यैः कश्चित् प्रत्ययार्थोपि विषयीभूत

५ ६

निरूपितप्रत्ययजन्यतावच्छेदकीभूत ५ प्रत्यय उपस्थिति

तत्र प्रत्ययजन्यतथाविधसमूहालंबनोपस्थितेर्विशेष्यतासंबंधेन पुरुषेपि सत्वात् तस्य राजप्र
कारकान्वयबोधे विशेष्यतया भानोपपत्तिरिति चेत्। न च प्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेनो
शुभ) पस्थितेर्हेतुत्वोपगमान्नोपपत्तिः तादृशसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यताया नाप्र
त्ययजन्यतावच्छेदकत्वादिति वाच्यं। ज्ञानभेदेन विशेष्यताभेदाभावात् अकृत्रिमस्य प्रत्ययादेवलक्षण
दिना पुरुषाद्युपस्थितिस्तत्र तादृशोपस्थितिविशेष्यतातः पुरुषादिपदजन्यपुरुषाद्युपस्थितिवि पदार्थोपस्थिति
शेष्यताया अभिन्नतया तावतापि उक्तातिप्रसंगवारणासंभवादिति चेन्न। स्वजनकज्ञानीयप्रत्य विशेष्यतया
यवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासंबंधेनैवोपस्थितेर्हेतुतयोक्तसमूहा
लंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतायाश्च तादृशोपस्थितिजनकज्ञानीयप्रत्ययवृ
त्तिप्रकारतानिरूपितविशेष्यतासामानाधिकरण्यविरहान्नापत्तिप्रसंग इति वदंति। तदसत्।
प्रत्ययत्वस्यानुगतानतिप्रसक्तस्य दुर्वचतया उक्तकार्यकारणभावकल्पनाया असंभवात्।
राजसंबंधः पुरुष इत्यादौ संबंधादिपदोत्तरङस्पदत्वादिभ्रमदशायां संबंधादिविशेष्यकराजादि
प्रकारकान्वयबोधानुपपत्तेः। राज्ञः पुरुष इत्यादौ ङस्पदादौ संबंधादिपदत्वभ्रमेपि स

...नन्वधापत्तिः एकत्वेतु नील पर परमी। नोपदेत्वादिवाक्यजन्यप्रामाण्या... स्वरसंगिनः

व्यु० वा० ॥१३॥

वैशिष्ट्ये राजादिप्रकारकान्वयबोधापत्तेश्च ॥ न च प्रत्ययत्वे न ह्यातंप्यपदं तत्र न्योपस्थितेः
कारणत्वादेतद्दोषद्वयस्यानवकाश इति वाच्यं । राज्ञः पुरुष इत्यादौ षष्ठ्यादेः ङस प्रत्ययत्वाद्यनु
पस्थितावपि आनुपूर्वीविशेषप्रकारकज्ञानाधीनतत्पदार्थोपस्थितिसत्त्वे शाब्दबोधप्रसङ्गात् प्र
त्ययत्वप्रकारकज्ञाननिवेशासंभवात् । इदं पुनरत्र तत्त्वं । राजपुरुष इत्यादौ पुरुषादिविशेष्यक
राजादिप्रकारकभेदान्वयबोधस्याप्रसिद्ध्यैव नापत्तिसंभवः । यत्र षष्ठ्यादिविभक्तेरेव स्वारसिक
ए लक्षणया ज्ञाप्तिक्रमेण वा पुरुषाद्युपस्थितिः तत्र तादृशविशेष्यकराजादिपदार्थप्रकारकभेदान्वयबोधः
प्रसिद्ध इति चेत् । नहि तादृशबोधे तथाविधप्रकृतिप्रत्ययानुपूर्वीरूपाकांक्षाज्ञानसहकृततद्वि
भक्तिधीजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृशबोधोत्पत्तिनियामकतया तदभा
वादेव न तदापत्तिः । अत एव स्वत्वादिसंबंधेन राजादिविशिष्टपुरुषादितात्पर्यकतद्वादिपदघ
टितस्सुंदर इत्यादिवाक्यात् पुरुषादिविशेष्यकस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्य व्यु० वा०
प्रसिद्ध्या राजपुरुषः सुंदर इत्यादौ पदार्थोपस्थितियोग्यताज्ञानबलात्तादृशशाब्दबोधापत्तिरे ॥१३॥
पि निरस्ता । स सुंदर इत्यादिवाक्यार्थशाब्दबोधसामग्र्यास्तत्पदत्वावच्छिन्नविशेष्यकसु

दरादिपदसमभिव्याहारज्ञानसहकृततद्वादिपदजन्यतादृशविशिष्टार्थोपस्थितिघटिततया तद
भावादेवापत्त्यभावात् । अथैतादृशरीत्या आपत्तिवारणे राज्ञः पुरुष इत्यादौ स्वत्वादिसंबंधेन पुरुषा
दौ राजाद्यन्वयबोधस्वीकारेऽपि क्षतिविरहात् । उक्तव्युत्पत्तिर्निर्युक्तिका विभक्तीनां संबंधादि धा
वाचकत्वमपि निर्युक्तिकं । नीलो घट इत्यादौ विशेषणवाचकपदसमभिव्याहृतविभक्तेरिव स
र्वविभक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचितत्वात् । नहि तथाविधान्वयबोधोपगमे तत्स्थलीय
६ य सामग्रीबलाद्राजपुरुष इत्यादावपि तथाविधान्वयबोधप्रसंगः संभवति । तत्स्थलीयसामग्र्याः
षष्ठ्यन्तराजपदत्वावच्छिन्नधर्मिकपुरुषादि [redacted] पदसमभिव्याहाररूपाकांक्षा हा
ज्ञानघटिततया तदभावादेव तत्र तादृशसामग्र्या अभावात् । एवं च राजपुरुष इत्यादिसमा ष
से राजादिपदस्य राजसंबंध्यादिलक्षणास्वीकारेऽपि व्यर्थः । तत्र भेदान्वयस्वीकारेऽपि क्ष
तिविरहात् । न च तत्र भेदान्वयस्वीकारे तत्स्थलीयसामग्रीबलाद्राजपुरुष इत्यादावपि
तादृशबोधापत्तिः । तत्स्थलीयशाब्दबोधे राजादिपदाव्यवहितोत्तरपुरुषादिपदत्वरूपानु
पूर्वीविशेषज्ञानस्य हेतुतया समासस्थले पुरुषादिपदस्य विभक्त्या राजादिपदाव्यवहित

बु॰ वा॰ ॥१४॥

रत्वस्यानुपूर्वीविशेषज्ञानं [illegible] संभवेन तत्र ताद्दशबोधसामग्र्या असत्त्वात्॥ नच
प्रकृतिप्रत्यययोरेवानुपूर्वीविशेषस्याकांक्षात्वात् प्रातिपदिकद्वयान्वयबोधानुपपत्तिः आनु
पूर्वीविशेषज्ञानस्य हेतुत्वमेवानभ्युपगमात् कुतो भिन्नत्वमिति वाच्यं भवन्मतेऽपि राजपुरुष इत्यादौ याद
शी सामग्रीबलाद्राजपदार्थराजसंबंधिपुरुषपदार्थयोरभेदान्वयबोधस्ताद्दशसामग्रीबल
हा द्रात्तः पुरुषश्चायं परराजपदस्य राजसंबंध्यादौ लक्षणागम्यत्वे ताद्दशाभेदान्वयबोधस्य संग ह
त्वारणीयत्वाद्विधानुपूर्वीविशेषज्ञानस्य समासजन्यबोधे हेतुत्वकल्पनस्यावश्यकत्व
श्री त् अस्माभिरभेदान्वयबोध एव ताद्दशानुपूर्वीज्ञानस्य हेतुतायाः कल्पनीयत्वात्॥ नचाभे
दे मलत्वस्य राजसंबंधिनि राजपदस्य स्वारसिकलक्षणाग्रहे राजपुरुष इत्यत्र राजसंबंधिपुरुष
योरभेदान्वयबोधो भवति द्वयोरपि विशेषणविशेष्यभावापन्नत्वे असौ समासः षष्ठीतत्पुरुषो भवन्मते
तु कर्मधारय इति। एवं च पुरुषविशेष्यकाभेदसंसर्गकराजसंबंधिप्रकारकबोधं राजपदाव्य शिव॰ ॥१४॥
वहितोत्तरपुरुषपदत्वप्रकारकज्ञानहेतुत्वमनुभवयत्वादिसिद्धमेव भेदान्वयबोधे ताद्दशानुपूर्वी
ज्ञानहेतुताकल्पनमधिकमिति वाच्यं॥ उक्ताभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां

रु१ ७

पर्यायशब्दांतरघटितानुपूर्वीज्ञानजन्यतथाविधाभेदान्वयबोधे व्यभिचारवारणाय ताद्दशानुपूर्वी
ज्ञानानंतर्गतस्य कार्यतावच्छेदककोटौ वक्ष्यमाणविशेषणीयतया तत्र विषयनिवेशप्रयोजनाभावे
न ताद्दशकार्यतावच्छेदकस्यैवाभेदान्वयबोधसाधारण्येनानुपूर्वीज्ञानस्याभेदान्वयबोधे हेतुता
या अनाधिक्यात्। एवं तंदुलं पचतीत्यादावपि पाकादिरूपधात्वर्थे कर्मत्वादिसंबंधेनैव तंदुला
द्यन्वयबोधः स्वीकर्तुमुचितः। कर्मत्वादेः पाकादौ प्रकारत्वे तत्र द्वितीयादेः शक्तिकल्पने
ताद्दशवाक्यजन्यशाब्दबोधे कर्मत्वादिसंसर्गस्याधिकस्य विषयताकल्पने च गौरवात्। नहि
तंदुलं पचतीत्यादिवाक्यजन्यशाब्दसामग्रीबलात् तंदुलः पचतीत्यादावपि तथाविधान्वयबोधो
पत्तिः संभवति। ताद्दशान्वयबोधे द्वितीयांततंदुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसम
भिव्याहारज्ञानस्य हेतुतया तंदुलः पचतीत्यादौ ताद्दशसामग्र्या अप्रसिद्धेः॥ एवं पच्यते चैत्रेणे
त्यादावपि कृतिसंबंधेन पाकादिधर्मिकचैत्राद्यन्वयबोधस्वीकार उचितः अन्यथा तत्र तृतीयायाः गौरवा
त्। नच ताद्दशान्वयबोधस्वीकारे तत्स्थलीयसामग्रीबलात् पच्यते चैत्रः पाक इत्यादौ तथा
[illegible] पत्तेरप्युक्तरीत्यैव वारणासंभवादिति। मैवं। राजः पुरुष इत्यादौ षष्ठ्यादेः स्व

शु० का०
॥१६॥ प्रत्यक्षादौ धा॰ नयोजकतया तादृशेच्छायामसत्यामुपदर्शितावच्छिन्नवैशिष्ट्यबोधस्य प्रत्यु-
रके च्छाबलादुपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तये॰ तादृशविषयतायाएव तत्र प्रतिबध्य-
तावच्छेदकत्वेनोपगमावश्यकत्वात्॰ न च स्वत्वादेः प्रकारतामतेऽपि स्वत्वादिसंबंधावच्छिन्न-
प्रतियोगिताकराजाद्यभाववत्त्वावच्छिन्नपुरुषादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबंधकता-
विकल्पेन गौरवं॰ तत्संसर्गतामते तादृशसामग्र्याः स्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकरा-
जाद्यभाववत्त्वनिश्चयाभावघ[illegible]टिततया [illegible]तत्सत्वे कारणविरहादेव तथाविधप्रत्यक्षवारण-
प्रत्यक्षप्रकारतावच्छिन्न संभवादिति वाच्यं॰ मन्मते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकताधिक्येऽपि नि-
रूपितस्वत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाववत्त्वावच्छिन्नस्वत्वादिवैशिष्ट्यबोधे तथा-
विधसामग्र्याः प्रतिबं[illegible]धकत्वाकल्पनेन तद्दोषसाम्यात्॰ तथा च पूर्वोक्तराजस्वत्वाभावव-
त्पुरुषः सुंदरः पुरुषादिवाक्याद्वैशिष्ट्यप्रत्यक्षं प्रति राज्ञः पुरुषः इत्यादिवाक्यसामग्र्याः प्रति- शि० बं०
बंधकत्वकल्पनं संसर्गतावादिमतेऽधिकमिति। न च स्वत्वादेः प्रकारतामतेऽपि प्रत्यक्षादि- ॥१६॥
कं प्रति तादृशसामग्री प्रतिबंधकतायामपि शक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्येन

नि मतान्त

राजस्वत्वाभाववान्पुरुषइत्यादिबाधाभावानिवेशाधिक्येन च गौरवं॰ अस्मन्मते तादृशोपस्थिति-
धा तथाय[illegible]भावादीनां तथाविधवाक्यजन्यशाब्दबोधं प्रति हेतुतया तादृशवाक्यघटितसामग्री संसर्गता
प्रतिबंधकतायां तेषां मनिवेशादिति वाच्यं। एवं मतेऽपि स्वत्वादिसंबंधावच्छिन्नप्रतियोगिता-
रा [illegible]आभावव्याप्यराजस्वत्वाभाववान्पुरुषइत्यादिनिश्चयस्य तदभावव्याप्यवत्तानिश्चयमुद्र-
नादृशवाक्यजन्यशाब्दधीविरोधितया तादृशनिश्चयाभावस्य तथाविधशाब्दसामग्रीप्रतिबं-
१ लाघ धकतायां निवेशानस्याधिक्ये न[illegible]धानयमान्यात्। मन्मते राजस्वत्वाभाववान्पुरुषइत्यादिबाध- प्रत्यक्षप्रतिबंधक...
भावानिवेशो नैव तादृशनिश्चयकाले प्रत्यक्षो[illegible]पत्तेस्तदभावानिवेशात्॥ यत्तु राज्ञः पुरुष इत्य- ...धु
दो राजस्वत्ववान्पुरुष इत्याद्यन्वयबोधोपगमे राजकीयस्वत्वं राजस्वत्ववान्पुरुष इत्याकार-
द्विविधानुमितेरेव तदतिरिक्ताविषयकत्वेन तथाविधानुमितिं प्रति प्रत्येकं तादृशवाक्यघटित-
सामग्र्याः प्रतिबंधकताद्वयं अस्मन्मये च तादृशानुमित्योस्तथाविधवाक्यजन्यराजकीयः
पुरुषः इत्यादिशाब्दबोधादतिरिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पनं
नास्तितथाविधानुमिति तथाविधशाब्दसामग्र्योः सत्वेऽनुमितेरेवोपपत्तेरपि तु राजकीयः पु

२१०

व्यु० वा० ॥२०॥

घटादौ घटादिपदस्य घटप्रतियोगिकाद्यौ तदुत्तरसुब्विभक्तेरेव प्रतियोगितायां लक्षणामभ्युपेत्य
तत्र घटप्रतियोगिकाभावो भूतलवृत्तिरिति बोधाकारः प्रकृते प्रतियोगिताप्रकारकत्वाद्बोधोपगम
एव समुचितः तथा सति तथाविधसमभिव्याहारज्ञानघटितसामग्र्या घटप्रतियोगिकस्याभा
ववान् अभावः प्रमेयत्वादिविशिष्टो येन रूपेण बुद्धिप्रतिप्रतिबन्धकतावच्छेदकत्वेन नञ्घटादिसमु
च्चयेन निपातातिरिक्तत्वं विशेषणत्वेन यथार्थमिति चेन्न भूतले न घट इत्यादौ घटाभावे भूतलान्व
यितस्य सप्तम्यर्थाधेयत्वस्यैव तात्पर्यवशात् घटादौ सप्तम्यन्तार्थभूतलादिवृत्तित्वाभावस्यान्व भाव
यबोधोऽप्यनुभवसिद्धः अन्यथा तादृशवाक्यजन्यस्याप्रामाण्ये सोऽनानास्कन्दित बाधस्य भूत
ले घट इत्यादिवाक्यजन्य घटादिविशेष्यकभूतलाद्याधेयत्वप्रकारकबोधविरोधितायाः सर्वानुभ
वसिद्धाया अनुपपत्तेः नञ्पदार्थेनापत्र धर्मिणि यस्य विशेषणतया भानं यादृशसमभिव्याहार
दर्शने तादृशसमभिव्याहारस्थले नञ्सत्त्वे तत्र धर्मिणि तदभावः प्रतीयते इत्यनुभावात्तत्र द्विव० ॥२०॥
व्यपप्रसंगाच्च । तथा च नञर्थाभावे अनुगततया घटप्रत्ययबोधोपपत्तये निपातातिरिक्तत्वं
विशेषणमावश्यकं । न चोक्तस्थले पुनरभावत्वस्य लक्षिततया अभाववता सममनुयोगि
एवं न पचति चैत्रः चैत्रस्य न धनमित्यादौ पाककृति चैत्रस्वत्वाभावस्य नञर्थस्य चैत्रधनादावन्वयबोधोपपत्तये घटो
न पट इत्यादौ नञर्थे पराभिमतस्यान्वयबोधोपपत्तये तु तदावश्यके ॥

यत्र नञ्संसर्गकबोधांशे कारणं तादृशबोधकाले नीलो भेदाभाववान् घट इत्यादिप्रत्यक्षवारणाय समभ्याः प्रतिबन्धक
त्वमध्येकल्प्यं तत्प्रकारबोधोपगमे तु तादृशबाधदशायां बाधज्ञानस्य प्रतिबन्धकत्वेन तदभावरूपकारणविरहादेवापत्त्यनव काशात् ।
नो भेदान्वयबोधस्यैव तत्रोपेयतया इति वाच्यं । तथा सति सर्वत्राभावपरत्वे नञर्थतया मुख्यार्थपर
त्वेन दुर्लभत्वापत्तेः अभावस्य भेदान्वयबोधोपगमेऽपि कार्यकारणभावकल्पनाधिक्याच्च इहेत्यादि
नव निलक्षणत्वाभिधानात् । अभाववतो भेदान्वयबोधोपगमे भूतले घट इत्यादिवाक्यजबोधे भू
तले न घट इत्यादिवाक्यजन्यबोधस्याविरोधित्वापत्तेः अलाघवात् स्वरूपसंबन्धेन ग्राह्याभा
प्रकार वनिर्णयस्यैव विशिष्टबुद्धिविरोधितायाः तत्र भेदसंसर्गकग्राह्याभावाश्रयप्रकारकनिश्च दृष्टान्त
यस्येति । नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेऽपि पीतघटः स्यादित्यादिसंभ
वतीति तथापि तत्रापि न नो विद्वेषपरलिंगकं । प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविध
याः विभक्तिः चसुप्तिङ्भेदेन द्विविधा सुब्विभक्तयः प्रथमाद्वितीयादयः सप्त तत्र प्रथमार्थः
प्रकृत्यर्थविशेषणविधया अन्वयिनी संख्यैव अत एव तत्रविशेष्यवाचकसमानविभक्तिकं
पदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्यविशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्य प्रकृत्यर्थः
तयैव भासते । संख्यावाचकानां च एकवचनद्विवचनबहुवचनानाम् एकत्वद्वित्वबहुत्वावच्छिन्नेषु शक्तिः यानि तावत्सु आओजसमादिनानर्थसुप्तिङ्साधारणैकवचनत्वादि

अनुयोग्यसमभिव्याहृतनञ् एवतादृशत्वं संभवतीयादि १२
। विशाखंशपा३

मु० प्रा०

॥२५॥ द्वित्व... वच्छिन्नभेदः प्रतीयते स च न स्वव्यापकाकाशत्वघटत्वादिसंबंधावच्छिन्नप्रतियोगिता
वच्छेदकताकः तादृशसंबंधेन द्वित्वस्य तत्राप्रसिद्धेः अपि तु पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकत
कत्वघटत्वकालिकपर्याप्तिसंबंधेन द्वित्वविशिष्टघटत्वरूपेण प्रतियोग्यत्वेन नतु स्वपरंपरासंबंधेन तादृशद्वित्व
द्विरूपीति अथाकाशेन द्वाविंशत्यादिके यत्र पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदो न आधा
धयितुं न शक्यते आकाशो घटयुक्तद्वित्वपर्याप्तेः सत्त्वेन तत्र तेन संबंधेन तद्भेदस्य वक्तुमश
क्यत्वात् आकाशत्वव्याप्यपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्ध
तयोरित्यन्ताद्वित्वादिपर्याप्तेरनव्याप्तिर्धर्मेणैवावच्छेदात् । तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेनत
द्भेदस्य तेन न संबंधेन द्वित्वादिमतो भेदस्य च तदनिवृत्तौ बाधकाभावात् । न चैवं घटपटौ न द्वावित्यपि
प्रयोग आपद्येत घटपटयोरपि प्रत्येकं द्वित्वावच्छिन्नभेदसत्त्वादिति वाच्यं द्वित्ववत्त्वानुपस्थाप्यद्वित्वादि
वच्छेदेन द्वित्वाद्यवच्छिन्नभेदस्य बाधेन तादृशप्रयोगाभावोपपत्तेः न आश्रयासज्यवृत्तिधर्मावच्छिन्नप्र शिव०
तियोगिताकभेदस्य धेरस्य तदवच्छेदकावच्छेदेनैव बोध्यतया तद्व्यक्तिसामानाधिकरण्येन तद्बोध ॥२५॥
स्याकांक्षाकत्वात् । न च घटत्वादेरतिप्रसक्ततया द्वित्वादिपर्याप्तेरनवच्छेदकत्वात्तदवच्छेदेन द्वित्व

निराकृतत्वात् । अस्तु वा तेन रूपेणानेकवचनस्याप्येकत्वे शक्तिः तथापि तज्जन्यैकत्वोपस्थितेः शाब्द
बोधोपयोगित्वेमानाभावः । नहि सामान्यत एकवचनज्ञानजन्यैकत्वोपस्थितित्वेन तच्छाब्दबोध
हेतुतासंभवः तथा सत्येकत्वे अगृहीतसुपद्वृत्तिकस्य पुंसः सुपदप्रकृतिघटादिपदोपस्थाप्य घटादि
पदं तादिपदोत्तरामादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसंगः किंतु सुपदत्वादिप्रकारकज्ञानजन्यत्वं
पस्थितित्वादिनैव तथा सति घटादिपदोत्तरसुपदत्वादिरूपानुपूर्वीविशेषरूपाकांक्षाज्ञानघटि
तायां घटादावेकत्वान्वयबोधस्य सामग्र्यां सुपदत्वादिप्रकारकधीजन्योपस्थितेरंतर्भावात् तादृशा
पत्तेरनवकाशात् एवं च पचतियादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेन तच्छाब्दबोधहेतुत्वेम
नाभावइति यत्तु नवीनैः संख्यानभिधायकत्वे चैत्रः पचति तंदुलं चैत्रेण पच्यते तंदुलइत्यादौ क
र्तृकर्मवाचकपदात् तृतीयाद्वितीययोरापत्तिः कर्तृकर्मसंख्यायाअनभिधाने कर्तृकरणयोस्तृ गत
तीयेति कर्मणि द्वितीयेति सूत्राभ्यां तयोरनुशासनात् नैयायिकमते लकारस्य कर्तृकर्मवाचकत विध०
यातदनभिधानस्य तृतीयाद्वितीयानियामकत्वासंभवात् । न च कर्त्रादिगतसंख्यानभिधानमे ॥३२॥
वकथं कर्त्रादिवाचकपदोत्तरं तृतीयादिनियामकं चैत्रेण पच्यते तंडुलइत्यादिस्थलेपि लकार

ख्यान्वयबोधकत्वं नाख्याततस्य आख्यातानभिधानामपत्तेः न्वयस्तद्विशेष्यकसंख्याबोधस्य वा ... मेदानिश्चयाप्रसक्तिसंसारान्य तरसंबंधेन)

स्य चैत्रादिगतसंख्याभिधायकत्वात् एकत्वादिनाएकत्वसामान्यस्यैवैकवचनाद्यभिधेयत्वादिति वा
च्यं । यतस्तद्गतसंख्यानभिधायकत्वं प्रकृते न तद्गतसंख्यानिष्ठविषयतानिरूपकत्वं अपि तु तद्विशेष्यकसंख्या
प्रकारकशाब्दबोधाननुकूलत्वमेव तथा च कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकत्वं कारकादिसमभि
व्याहृतकर्त्रादिवाचकपदात्तृतीयादयो भवंतीत्यत्र तदनुशासनतात्पर्यं चैत्रेण पच्यते इत्यादौ चैत्रादि
विशेष्यकसंख्यातेन जननात् तादृशाभावेनान्वयबोधविशेष्यस्य प्रथमांतपदोपस्थाप्यत्वे चैत्रः पच
ति तंडुलमित्यादौ चैत्रादिः साक्षादेव भावनाविशेष्यः चैत्रेण पच्यते तंदुलइत्यादौ परंपरया चैत्रनिष्ठ
भावनाजन्यफलशाली तंडुलइत्याकारबोधस्य तत्रोदयात् । तस्मात्तिबादेरपि संख्याबोधकत्वमावश्य
कं इति तन्न विचारसहं तथाहि कर्त्रादिनिष्ठसंख्यान्वयबोधाननुकूलत्वं यदि तादृशबोधोपधायक फलो
ज्ञानाविषयत्वाभावव्याप्यत्वं तदा योग्यतावादिज्ञानेन सहकार्यंतरविरहात्तादृशबोधोनाजनि तथोग तः
तृतीयाद्यापत्तेः यदि च तादृशबोधकस्वरूपयोग्यज्ञानविषयत्वाभावस्तदा सदादिसमभिव्या
हृतात्मनेपदादिज्ञानस्यापि तादृशबोधस्य स्वरूपयोग्यत्वात् तत्स्वरूपयोग्यज्ञानाविषयतिबाद्यव्या
तेस्तेषा सिद्धः । अथ कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताव

यतः एकत्वेन रूपेण एकत्वादीनां ख्यातस्य शक्तत्वेन चैत्रेण पच्यते तंडुलइत्यादौ कर्तृगतसंख्याभिधानापत्तिः निरूपकत्वे स्यहुर्ल्लत्वेन तृतीयाद्यनापत्ति

पु० भा०

॥३६॥ विशेषणतया अनभ्युपगमात् । अन्यथा चैत्रो मैत्रश्च गच्छतः इत्यादावेकवचनस्य द्विवचनस्य बोधासंभवात् । ओजसादिरूपाणां व्युत्पत्तिद्वाराद्विवचनबोधानन्वयित्वाद्विसु वस्त्वादेर्नाद्वित्वादिबोधनसंभवात् । ओजसादिरूपाणां सर्वत्र स्मृतिद्वारा द्विवचनबोधानन्वयित्वाच्च द्वित्वसु वांसत्त्वसादि सूत्रेण ओजसादिस्थानेऽस्याचादेशस्य वैयर्थ्यात् । चैत्रादिपदोत्तरैकवचनस्यापि द्वित्वादिलो भयोरेकत्वे तदप्रकृत्यर्थमैत्रादिसाधारणद्वित्वादिबोधे चोक्तव्युत्पत्तिविरोधेनानुपपत्तिश्च । आख्या दाते
तार्थसंख्यान्वयबोधे च समानविशेष्यकतदर्थभावनान्वयबुद्धिः सामग्री अपेक्षिता । भावनायां बा धादिगृहकाले तत्र तात्पर्यभून्यकाले वा उक्तस्थलेऽद्वित्वाद्यन्वयबोधात् । भावनायाः अविशेष्यत्वाप्य र्थादौ संख्यान्वयबोधाच्च तादृशसामग्र्याः संख्यान्वयबुद्धित्वावच्छिन्ने प्रति न स्वात् त्र्योगाहेतुत्वात् एकत्वेनापि आख्यातजन्यसंख्योपस्थितियोग्यतालानविशेषादिघटितसामग्र्या भावनान्वयाहिसं ख्यान्वयबोधस्य कदाप्यजननात् । संख्यान्वयबोधसाधारणभावनान्वयबोधत्वावच्छिन्ने तु ना बाध
के मपि तादृशसामग्रीघटकत्वेनापसभावात् । न च तादृशकारणतानां भावनान्वयबुद्धित्वं संख्यान्वयबु ॥३६॥
द्धित्वं वा जन्यतावच्छेदकमुपेयते इत्यत्र विनिगमनाविरहः संख्यामविषयीकृत्यापि भावनान्वय बोधस्यानुभवसिद्धत्वात् । द्वितीयस्य जन्यतावच्छेदकत्वासंभवादिति दिक् । अथ गुणादिवाचक

२

कर्मत्वविशिष्टस्य कर्मत्वेऽन्वयस्य निराकांक्षत्वादिति भावः । फलघटितपरंपरयान्वये त्वाह गोरेति

पदोत्तरद्विवचनबहुवचनयोः कथं द्वित्वादिबोधकता संख्यायाः गुणत्वेन गुणादौ बाधात् । न च तत्र स्वाश्रयसमवेतत्वादिसंबंधेन द्रव्यगतद्वित्वादिकमेव भासत इति वाच्यं । एकत्व कावपि तादृशसंबं धेनाद्वित्वादेः परिसंख्यासत्तया एकमात्रतात्पर्ये तादृग्द्विवचनाद्यापत्तिरिति चेत् । अपेक्षाबुद्धिविष यत्वमेव तदुत्तरद्विवचनादिना बोध्यते तच्चैकमात्रवृत्तिधर्मस्य प्रकृत्यर्थतावच्छेदकत्वस्थले प्रकृत्य र्थतावच्छेदक[illegible]व्यापकत्वविशिष्टपर्याप्तिसंबंधेन प्रकृत्यर्थे अन्वेति अन्यत्र शुद्धपर्याप्तिसंबंधेने
। वेदु पामर। मशी: तिनद्वंद्वादिस्थले कृशोदरेति कर्मत्वाद्वितीयेत्यनुशासनात् । कर्मत्वं द्वितीयार्थः । तत्र कर्मपदस्य धा त्वर्थपरत्वात् । सत्तम्याचकतार्थत्वात् । कर्मणश्च नतथात्वं कर्मत्वनामार्थस्य ग्रामादेरभेदान्वयसं भवेऽपि धात्वर्थगमनादिनाऽतदन्वयासंभवात् । गोरवाच्यकर्मत्वं चान्यक्रियाजन्यफलशालित्वं तच्च क्रियाधातुत्वतत्वल्भ्यतेजन्यजनकभावस्याविनैव पदार्थत्वसंबंधमर्यादया भानसंभवतीति फ लमात्रं कर्मप्रत्ययार्थः । न च संयोगविभागरूपफलमपि धातुलभ्यमेव गमिपयजप्रभृतीनां तद् वच्छिन्नस्पंदादिरूपव्यापारवाचित्वादिति वाच्यं । व्यापारमात्रस्य धात्वर्थत्वात् । फले विशेषा
नाद्रे न्वयबोधे चान्यक्रियाविशेषजन्यव्यापारोपस्थितेर्हेतुत्वया ग्रामं यजतीत्यादौ धात्वर्थस्पंदेग्राम

(स्पंदात्मकफलानुकूलव्यापारं गोति । न योदन्वयांगीकारे त्वाह ।५)

धा॰ ५१० (यद्यप्यव्यवहितोत्तरसंबंधेनोपस्थितिविशिष्टस्य कार्यतावच्छेदकत्वे फलव्यापारो धात्वर्थ इति मतेगमनंस्पंदत्वापत्तिः संभ
वत्कारणाभावात् शाब्दबोधस्याप्रसिद्ध्यापत्तिः संभवति)

॥३८॥ फलबोधोत्पादप्रयोजिकाया असत्वे ननु तत्स्थले तदापत्तिसंभव इति वाच्यं यत्रगमनादिपदादेवलक्षण
याशक्तिभ्रमेण वा स्यात् तत्रफलोपस्थितिस्तत्रफलं विशेष्यकस्पंदभेदान्वयबोधप्रसिद्ध्या गमनप
दसमभिव्याहारजन्यफलोपस्थितिघटितसामग्र्याः फलविशेष्यकस्पंदत्वाद्यवच्छिन्नभेदान्व
यबोधप्रयोजकतायाआवश्यकत्वात् न द्वले नशक्तिप्रमाधीनबोधेपिफलांशे स्पंदभेदादिभानप्र
संगः एवं च फलव्यापारयोः पृथक्शक्तिस्वीकारपक्षेपि न निस्तारः तथात्वेपि हि गमनंनस्पंद
इत्यादौ फले शक्तिप्रमया स्पंदभेदान्वयबोधसंभवेन तादृशप्रयोगापत्तेर्दुर्वारत्वादिति चेन्न तद्वि
शेष्यकधर्मितानजन्यतदुपस्थितिजन्यतावच्छेदककोटौ तादृशोपस्थित्यव्यवहितोत्तरत्वानवेशान
मावश्यकं विशिष्यतत्तत् पदमंतर्भाव्येव पदार्थोपस्थितेरेकैक विधबोधे नानाहेतुतायाव्यय
स्थापितत्वात् एकपदार्थीनतद्विषयकशाब्दबोधे पदांतरवृत्तितानजन्यतदुपस्थितेर्व्यभि ॥३९॥
चारस्य प्रकारांतरेण वारणासंभवात् एवं च धात्वर्थतावच्छेदकफले द्वितीयार्थान्वयबोधेपि
व्यतिरेकः तत्र तादृशाकारणस्य व्यभिचाराप्रसक्तेः इति वदंति अत्रेदं चिंत्यते व्यापारमात्र
स्य धात्वर्थतायामपि सर्वानुपपत्तीनामुक्तत्वात् फलावच्छिन्नव्यापारस्य गुरुतयात धात्वम
(शक्तशब्दबोधत्वशक्यतावच्छेदकपदजन्यधर्मितावच्छेदकपदजन्योपस्थितिहेतुत्वे तादृशपदाद्युपस्थितिहेतुत्वं तादृशशाब्दबोधत्वं शक्यतावच्छेदकपदजन्यशाब्दोपस्थितेर्हेतुत्वे बोधिकालांतरजन्य
शाब्दबोधे व्यभिचार इति भाव्यं वहितोत्तरत्वनिवेशान मापद्यते इत्याहुः ५)

(अपि शब्दः आसांसंतेनेतिबहुवेणा चारस्यकर्मसंज्ञादिविभागात् ३)

नुचितं अथ फले द्वितीयार्थः शक्यतंतरकल्पनामपेक्ष्य धातोर्विशिष्टशक्तिकल्पनमेवोचितं न च भवन्म
ते व्याधेयत्वे द्वितीयार्थः शक्त्यंतरस्य कल्पनीयत्वात् देशेसाम्यमिति वाच्यं ग्रामं गच्छति ग्राममधि
शेते ग्रामं संयुनक्ति इत्यादौ द्वितीयायाः सर्वमतएवाधेयत्वबोधकतया द्वितीयादेः फलवाचकत्वम
तेपि आधेयत्ववाचकतायाआवश्यकत्वात् न च द्वितीयायाः संयोगादिवाचकत्वमते आधेयत्वेन
स्याल्लक्षणैव न तु शक्तिरिति वाच्यं आधेयत्वत्वस्याखंडतया संयोगत्वादिसमशरीरत्वात् संयोगत्वा
द्यवच्छिन्ने तदवच्छिन्ने वा शक्तिः कल्प्यते इत्यत्रविनिगमकासंभवात् अस्तु वा ममाप्याधेयत्वे लक्ष
णैव शक्तिस्तु संख्यायामेव यद्यदेव च द्वितीयादेः फलबोधकता मते फलेपि तस्याल्लक्षणैव ननु शक्तिः
शक्तिस्तु संख्यायामेव संयोगविभागादिकं प्रत्येकफलापेक्षया संख्यायां तत्संयोगप्राचुर्यं स्याद्गौरवम
मकत्वादिति यद्यपि तथापि तन्मते धातुधातुजन्यशुद्धव्यापारोपस्थितेः शाब्दबोधहेतुतो फलमनमधि
कं द्वितीयासमभिव्याहारस्थले तदनुरोधेन फलविशेषावच्छिन्नव्यापारे धातोर्लक्षणायाः भवत्
मथावश्यकत्वाद्धातुजन्यतादृशव्यापारोपस्थितिहेतुतायाउभयसिद्धत्वात् यदि च स्पंदत्वाद्यादि
लक्षणशक्तिभ्रमाज्जन्यतीयादितोऽपि शुद्धव्यापारबोधआनुभविक इति मन्यते तथापि तन्मते शा
(ननु आधेयमात्रबोधकत्वं धेनशक्यतावच्छेदकलाघवं यतः कल्पनापेक्षया एकसमवायत्वभासेन पदनिमित्तभाव)

त्यादौ सोरभ्यस्यात्मकधात्वर्थैकदेशविषयितायां निरूपितत्वसंबंधेनान्वयः। तादृशप्रकारताकत्व
स्य गंधविशेषावच्छेदेन धात्वर्थतानत्वान्वयः तेनार्थसमवेतपुष्पे गंधइत्यादिप्रत्यक्षस्य पुष्पांशे
आधेयतयाऽर्थप्रकारकत्वेपि तादृशप्रत्ययदशायां अर्थं जिघ्रतीति न प्रयोगः तादृशतानीयगंधवि
षयतायां अर्थप्रकारतानिरूपितत्वविरहात्। समवायावच्छिन्नाधेयत्वसंनिवेशाद् इदानीं गंधइत्यादि
प्रत्ययमादाय कालं जिघ्रतीति न प्रयोगः। तेनेदानीतनपुष्पे गंधइत्यादिप्रत्ययस्याधेयतासंसर्गेण
कालादिप्रकारकत्वेपि तादृशप्रत्ययदशायां कालं जिघ्रतीत्यादिको न प्रयोगः। तादृशतानीयगंधा
दिविषयतायां कालादिप्रकारतानिरूपितत्वविरहात्। अत एव पतदाननं मम सुरभिक्षितीश्वरो रहः ॥ सोधि ननद्रित्रिकाणवै
समाघ्राय न तृप्तिमाययौ। करीव सिक्तं पवनैः पयोमुचां शुचिव्यापायेव नराजिपल्वलमित्यादौ आ
घ्रायि वानगंधवहः सुगंधिरित्यादौ चोपाधिनिष्ठगंधग्रहतात्पर्येणैव जिघ्रतेः प्रयोगात् तादृशगं ॥ राघ०
धेयाननगंधवहादिप्रत्ययस्य बाधोपि न क्षतिः। तादृशगंधस्याननाद्यवृत्तित्वेपि आननेगंध ॥५३॥
इत्याकारकबोधीयगंधविषयितायां आननादिप्रकारतानिरूपितत्वेन बाधार्थबोधात्। यत्र
नीतचंपकगंधस्य यत्र वायवादिवृत्तित्वेनैव ग्रहस्तत्र चंपकं जिघ्रतीति प्रयोगस्तु नेष्यते एव।

धर्मविशेषणतयोपस्थितस्यस्यात्वेनागम्य त्र विशेषणतया अन्वयबुद्धेरव्युत्पन्नत्वात् यत्र च प्रत्यक्षपारतंत्र्येणैव बोधे विषयितायां आख्यातार्थे

यत्तु आधेयत्वमात्रं द्वितीयार्थः न तु समवायावच्छिन्नत्वाविशेषितमाधेयत्वं। तथा च मुखादिसंस्प
र्श मत्तिकादिगंधेपरंपरासंबंधेन मुखादिवृत्तित्वस्य सत्त्वान्नोक्तस्थले ऽनुपपत्तिरिति। तदसत्। ॥ दुर्वारत्वात्
तथासति घ्राणं जिघ्रतीति प्रयोगापत्तेः पुष्पं व्याघ्रायतइत्यादौ चानिरूक्तप्रकारत्वं आख्यातार्थः
आश्रयतासंबंधेन पुष्पादावन्वेति तस्मिन्धात्वर्थप्रत्यक्षस्य निरूपितत्वसंबंधेन तादृशविशेषणतापन्न
गंधविषयितायां तादृशसंबंधेनान्वयः। एकविशेषणतयोपस्थितस्य स्वातंत्र्येणान्यविशेषण
तयान्वयबुद्धेरव्युत्पन्नत्वात्। अत्र च प्रत्यक्षपारतंत्र्येणैव संबंधावच्छिन्नतायां आख्यातार्थे अ
भ्युपगमेन व्युत्पत्तिविरोधाविरहात्। अस्तु वा गंधो विषयिता लौकिकप्रत्यक्षीयविशेषकालत्वमेव धा
त्वर्थः कर्तरि आख्यातादिसमभिव्याहारे गंधविषयितायाः प्रत्यक्षविशेषणताकर्मण्याख्यातसमभि
व्याहारस्थले च प्रत्यक्षविशेष्यतेति न कश्चिद्दोषः। जिघ्रत्यर्थगंधविषयितानिरूपितनिरुक्त
प्रकारतानिरूपकत्वमेव पुष्पादिनिष्ठकर्मत्वमिति दिक्। अथ पश्यत्यादिसमभिव्याहृतद्वितीयाया
लौकिकविषयितार्थत्वे सौरभं न पश्यतीत्यादौ सौरभादिनिरूपितलौकिकविषयिताशालि
त्वस्य चाक्षुषप्रसिद्ध्या आकाशं न पश्यतीत्यादौ आकाशनिरूपितलौकिकविषयितायाः अप्रसि
द्धेः। तत्तद्विषयिताशालिचाक्षुषाप्रत्यक्षाभावरूपबाधकार्थाप्रसिद्धेः। न च सौरभं न पश्यती

समन व उिन्न वोध्यं अतो गमनादि र्क्ष लेतदनधिकरण २

व्यु॰वा॰ दवोध्यतदभावश्चसमानकालीनत्वादिसंबंधेनगमने: त्वेति समानकालीनत्वघटकं कालनि
११७६१ ष्ठस्याधिकरणदेशावच्छेदेनगमनाद्यभावसत्वेपिनातिप्रसंगः केचित्तुउक्तस्थलेः साहित्यभि
वा धायकनापदार्थस्तस्यचगमनादिकर्तर्यन्वयः असाहित्यंचस्वकर्तृकसमभिव्याहृतगमनादि
क्रियासमानकालीनताद्दशक्रियाकर्तृत्वरूपसाहित्याभावः क्रियान्वयीस्वकर्तृकताद्दक्रिया
कालीनत्वाभावएवथानुनार्थः कर्तृत्वेवचपुत्रादेराधेयतासंबंधेनान्वयः विभक्तिःसाधु
त्वार्थिकैव अस्तुवाआधेयत्वंतृतीयायाएवार्थः सप्तम्याआधेयतार्थकत्वेपिनात्रसप्तमी
प्रसंगः तस्याःकारकविभक्तित्वेनक्रियान्वयित्वेनक्रियान्वयिस्वार्थबोधकत्वात् शेष भम
षष्ठीप्रसक्त्यातामेवोपपदविभक्तिर्द्वितीयापाद्यतइतिसर्वोप्युपपदविभक्तिःषष्ठ्यपवादप
क इत्यस्याविरोधइति विनासमानार्थयोर्न्तरेणान्तरेणयोर्निपातयोरपदर्शितैवरीतिः र म
एवंविनायुक्ततृतीयापंचमीस्थलेपिमर्यादाभिविध्यर्थकयावद्युदयोगेपिद्वितीयाद त्रिवं॰
श्यते तत्रमर्यादार्थकायाश्चपदः आरभ्यतस्यांदशमीतयाचप्रपूजयेदित्यादौमर्यादा ११७६१
सीमाकालरूपादेशरूपाच कालानिष्ठत्वेन कालानिष्ठसमभिव्याहृतकालप्रागभा
वेन

वानधिकरणत्वप्रागभावाधिकरणत्वसजातीयप्रत्ययावत्कालवृत्तिसमभिव्याहृतक्रियानधिक
रणत्वं एवंचोक्तस्थलेयावच्छब्देनपूजारम्भक्रियायांशुक्लदशमीनिष्ठताद्दशसीमात्वनिरूपकत्व
प्रत्याय्यते तावतोयार्थतःशुक्लदशम्यामर्यादात्वंलभ्यते तन्निष्ठसीमात्वनिरूपकत्वंचतदव
त्तित्वेसतिशुक्लनवमीप्रागभावानधिकरणतत्प्रागभावाधिकरणतिथिवृत्तिव्यापकत्वंताव
ता षोडशतिथ्यधिकरणकषोडशपूजारूपस्यैककर्मणोविधेयतालाभः व्याप्यकालसमुद
येसजातीयत्वविशेषणात्पूजायाउक्तविशेषणद्वयाक्रांतदंडादिसमुदायाव्यापकत्वेपिन
बाधः अन्वयितावच्छेदकरूपेणसाजात्यस्याभिवक्षणादुक्तस्थलेचतिथिभिसाधयाव्याहार्
तद्दशमीपदार्थतावच्छेदकस्यातिथित्वघटितत्वेनयावपदार्थान्वयितावच्छेदकतया
तिथित्वभानात्तेनरूपेणदंडादेर्दशमीसजातीयत्वाभावात् तिथिश्चाखंडकालविशेष
रूप [illegible] नतुचंद्रमंडलस्याषोडशकलानुगुणक्रियाप्रचयरूपापूजायास्तावत्क्रियावृत्तित्वा
संभवात् अत्रचप्रागभावएवयावत्पदार्थः द्वितीयार्थः प्रतियोगित्वमनुयोगित्वंवात
त्रतद्घटकेसप्तमीदशम्याअन्वयः तावताचदशमीप्रतियोगिकप्रागभावलाभः तस्यचस्व

मैत्रकृतित्वावच्छेदेन

व्यु० वा० ॥८०॥ तादृशवाक्यस्तानघटितत्वादसामग्र्यां अधिकैकोपस्थितिनिवेशनेन गौरवात् अथ चैत्र
कृतेः तृतीयार्थतोपगमे चैत्रेण पच्यते न मैत्रेणेत्यादौ तृतीयांतार्थमैत्रीयकृतेरभावः पा
केऽन्वेतीत्युपेयं तस्याश्च समवायसंबंधावच्छिन्नाभावो मैत्रकर्तृकपाकेपीत्यतिप्र
संगः जन्यतायाश्च व्युत्पत्तिसामकतयात् संबंधावच्छिन्नाभावः प्रसिद्ध्येवेति नः मैत्रकर्तृ
कपाककर्मत्वाभावस्य कर्मणि तंडुलादौ प्रतीतिश्च कर्मवाचकपदसमभिव्याहारस्थले
दुर्घटः आधेयत्वस्य तृतीयार्थत्वे चाधेयत्वाभावबोधएव कृतावुपेयते न च तथासति
चैत्रमैत्रोभयकर्तृकपाकस्थले चैत्रीयपाककृतौ मैत्रवृत्तित्वाभावसत्वात् मैत्रेण न प न
च्यत इति प्रयोगापत्तिरिति वाच्यं मैत्रेण पच्यत इत्यादौ वर्तमानपाकानुकूलकृतित्वा
वच्छेदेन मैत्रवृत्तित्वाभावबोधनात् उक्तस्थले च तादृशकृतित्वसामानाधिकरण्येन मै च
त्रवृत्तित्वसत्वात् तादृशवाक्याप्रामाण्यात् वर्तमानत्वस्य कृतिविशेषणतया चैत्रेण व्यु० वा०
पच्यते ऽपच्यते न तु पच्यत इत्युपपद्यते क्रियाविशेषस्य तथात्वाद्यदा मैत्रेणान्यत्रा ॥८०॥
च पच्यते तेन न तु पच्यते तदा मैत्रेण न पच्यत इति प्रयोगश्च न चाख्यातेन कालस्य कृतिविशेषणता
पतेन न तु पच्यते तदा मैत्रेण न पच्यत इति प्रयोगश्च न चाख्यातेन कर्मप्रत्ययस्थले क्रियायाः कृ
पा बोधनात् कालविशेषावच्छिन्नकृतित्वावच्छेदेन कर्मप्रत्ययस्थले क्रियायाः

कृतित्वस्यान्वयितावच्छेदकतया तदवच्छेदेन भावाभावः शक्यो बोधयितुं न तु कालक्रियोभयविशेषित २

त्वविशेषणत्वाभावेन तद्घटितधर्मस्यान्वयितावच्छेदकत्वाभावादिति वाच्यं क्रियाविशेष
न घटितधर्मस्यान्वयितावच्छेदकत्वेपि तदवच्छिन्नत्वावच्छिन्नविशेषणताया अभावसंसर्गत
याभानसंभवेन नसामंजस्यात् न चान्वयितावच्छेदकावच्छिन्नत्वमेव विशेषणसंबंधे भासत
इति नियमः तथासति शारदपुष्प्यति सप्तच्छदा इत्यादौ सप्तच्छदपुष्पोत्पत्तित्वादेः शरद्वृत्ति कृपस
न त्वाद्यन्वयितावच्छेदकतया आख्यातार्थप्रतियोगितावच्छेदकपुष्पत्वाद्यवच्छेदेन शरद्वृत्ति
त्वाद्यन्वयबोधाद् अवच्छेदकावच्छेदेनान्वयानुपपत्तेरन्वयितावच्छेदकसामानाधिकरण्य
मात्रे च तदन्वयोपगमे शारदपुष्प्यति सप्तच्छदः शारदपुष्प्यति चंपकादय इति विशेषण
प्रयोगापत्तिः यद्यपि तत्र शारसंबंधः सप्तच्छदविशेषणतया भासते न पुनराख्यातार्थे
धातुमात्रार्थे पुष्पे सत्सु अतएव तत्र कारकविभक्तिरूपसंख्या अनुपपत्त्या कालवि
शेषणपदोत्तरं स्यात् अत एव सप्तमीशार्थधर्मत्वानुशिष्टो एवं च निपातनिमित्तत्वरूपका
रकत्वगर्भकर्तृत्वस्याख्यातार्थत्वे पुष्पोत्पत्तिनिमित्तत्वरूपाख्यातार्थस्यावच्छिन्ना सरत्वेन
यानुरोधेन शारसंबंधेप्यन्वयो योपगंतव्य इति कारकत्वस्याख्यातार्थत्वानुपगमेपि

६

स

व्यु० वा०
॥८७॥

व्यवहारस्य चापत्तेः अन्यथासिद्धतया न हिंसात्वापत्तिः [illegible]मरणोद्देश्येन कृतौ यद्यपि तादर्थ्य
देयात्तत्र गवादिमरणेऽपि न तद्धिंसादिरूपस्तथा न व्याघ्रादिहिंसारूपोऽपि तत्करणद्वारायां
तीयाप्रयोगात् अतथात्वेऽपि तन्मरणोद्देश्यकात्स्पर्द्धाद्वारकतन्मरणप्रयोजककृतिजन्यव्या
पारस्याधिहिंसावत्पापजनकत्वादुक्तस्थले गोवधाभिसंधानेन गोवधप्रायश्चित्तसारे चेत्यभि
मतवधेयं तच्च चैत्रः पचतीत्यादौ विषयताघटितकर्तृनिर्वाहाय यथा कृतौ पाकादेरुप व
धायकत्वविषयित्वोभयसंबंधेनान्वयः विषयितायाः संबंधत्वेऽपि तदुपधायकतानिवेश
आवश्यकः पाकाद्यनिष्पत्तिस्थले पचति पक्ष्यतीत्यादिनाप्रयोगस्य प्रमात्वपरिहारकत्वा
त् तथा चैत्रेण पच्यत इत्यादावपि तृतीयार्थकृतेर्जन्यत्वविषयत्वोभयसंबंधेनान्वयो बो
ध्यः कृतिजन्यत्वस्य तृतीयार्थत्वे जन्यत्वसंबंधं बोध्यत्वस्यानिरूपकविषयत्वानिवेशा म
यं कृतिविषयत्वमेवाथवा तृतीयार्थः स्वनिरूपकजन्यत्वं विषयतायाः संबंधमध्ये तन्नि
वेशनीयं काष्ठैः पचतीत्यादौ करणत्वं तृतीयार्थः तच्च व्यापारवत्कारणत्वं व्यापारे कर्तृव्यापाराधी न्धिव०
नत्वं निवेशनीयं अन्यथा कर्तुरपि करणतापत्त्या चैत्रः चैत्रेण पचतीति काष्ठं चैत्रेण पच
तीत्यादिप्रयोगापत्तेः न च कर्तुः श्लेषादिरूपव्यापारस्य तदीयकृत्यादिरूपव्यापाराधीन ॥८७॥

प वत पा

र्थे

त्वया तादृशोपलक्षणोदानेऽपि कर्तुः करणत्वं दुर्वारमेवेति वाच्यं स्वभिन्नत्वेन कर्तुर्विशेषणीय
त्वात् यत्रैकैव पाकादिक्रिया चैत्रेण काष्ठादिना मैत्रेण तुषादिप्रक्षेपेण निष्पाद्यते त
त्र चैत्रस्तुषैर्मैत्रः काष्ठैः पचतीति प्रसंगः समभिव्याहृतकर्तृव्यापाराधीनत्वस्य तत्
गम्य त्कारणव्यापारे भानमुप[illegible]ारणीयं न च समभिव्याहृतकर्तृभावेन तृतीयार्थत्वे क र्थे
च र्तृसमभिव्याहृतस्थले करणे तृतीयाया अप्रयोगापत्तिरिति वाच्यं तत्राह हेतावि
ति सूत्रेण हेतुमात्रार्थकतृतीयासंभवात् धनेन कु[illegible]विद्यया यश इत्यादौ नाहं त लं
त्र करणे तृतीया क्रियायोगाभावात् न चैवमुक्तस्थले चैत्रस्तुषेण पचतीति प्रयोग
स्त स्य हेतौ तृती[illegible]वनादापत्त्यावि[illegible]ष्टापत्तिसंधिनो तथाभावात् समभिव्याहृतकर्तृ र्थे
भावस्य करणे स्वतंत्रतृतीयानुशासनस्यैव वा वैयर्थ्यापत्तेरिति वाच्यं उक्तस्थले पाके तु
षहेतुकत्वाभावबोधोऽपि चैत्रस्तुषेण न पचति किंतु दारुभिरेवेति प्रयोगोपपत्तये कर
णत्वे समभिव्याहृतकर्त्रभावेन तृतीयायाः शक्तिकल्पनायामावश्यकत्वात् तद्रू
हकतयैव करणे तृतीयानुशासनस्यावश्यकत्वात् द्वारैः दलितपचोयमित्यादौ तृतीया
याः समभिव्याहृतकर्त्रतिर्भावेन करणत्वार्थकत्वे तत्र समभिव्याहृतकर्तृतृतीया[illegible] कार त=प्र

कारकविभक्तिलरएव नहर्थान्वितार्थकत्व शासितादिपदेन समासस्यसाधुत्वानिर्वाहाच्च न च तृतीयायाः ९

व्यु॰ वा॰ ॥८०॥

मे रूपं२

प्यत्वमात्रप्रमाजन्यज्ञानाविषयत्वं॰ अतो वन्ह्यादेर्व्याप्यादिमत्ताधूमादिव्यापकत्वस्य
पि वन्हिनावच्छेदधूमवान्यमित्यादयो न प्रयोगाः॰ प्रमात्वं च यावद्भ्रमभिन्नत्वं यत्प्रतीयि- एमी
तेन धूमव्याप्यो जन्हेरित्यादिज्ञानस्य वन्हित्वाद्यंशे प्रमात्वमादाय नो क्तातिप्रसंगः॰ द्रव्य
त्वादेः प्रमेयत्वाद्यवच्छिन्नवन्ह्यादिव्यापकत्वेपि विशिष्टद्रव्यत्वादिना वन्हित्वाद्यवच्छिन्न
व्यापकत्वेपि च पर्वतो वन्हिमान् द्रव्यत्वाद् द्रव्यत्वेन वेत्यादि न प्रयोगः॰ अन्वयितावच्छेद
कवन्हित्वद्रव्यत्वादिना व्याप्यव्यापकभावस्य तत्तीयादिना बोधनात्॰ तेन रूपेण त तत्र
प्यव्यापकभावविरहात्॰ तद्व्याप्यवन्ह्यादिसत्वान्वयितावच्छेदकपर्वतत्वावच्छि-
न्नांशे व्यापकत्वव्याप्यत्वं योप्रतीयतद्रूपापन्ननियमः॰ तेन पर्वतो वन्हिमान्महानसत्वान्ते
नयेत्यादयो न प्रयोगाः॰ अत्रेदमवधेयं॰ पर्वतो वन्हिमान्धूमान्न द्रव्यत्वान्न महानसत्वादि पि
त्वादिहेतौ न अयवन्ह्यादौ द्रव्यत्वमहानसत्वादित्वाद्ज्ञानव्याप्यत्वाभावबोधेन बाधः॰ तत्र शिव॰
प्रमेयत्वादिना द्रव्यत्वादिज्ञानव्याप्यत्वस्य महानसा[illegible]त्वस्य च सत्वात्॰ वन्हित्वादि ॥८०॥
नाद्रव्यत्वादिव्याप्यत्वस्य पर्वतादौ महानसत्वाद्यव्याप्यत्वस्य चाप्र[illegible]सिद्ध्या नाभावप्रसायन
नसंभवद् इति ज्ञानप्रयोज्यत्वं ज्ञानजन्यतावच्छेदकत्वरूपं समभिव्याहृतपर्वतादिविरोध

(महानसोहा॰३) दि (वौ॰) नताप

व्यानानिरूपितविधेयत्वं चावच्छेकलितं पंचम्यर्थः॰ विशिष्टलाभोऽन्वयबलात्॰ एवं चो
क्तनञाविधेयतायां द्रव्यत्वमहानसत्वादिज्ञानप्रयोज्यत्वाभावः प्रत्याय्यते॰ तत्प्रयोज्यत्वं
च प्रमेयत्वाद्यवच्छिन्नविधेयतायामप्रसिद्धं॰ न चैवं पर्वतो वन्हिमान्धूमादित्यादेरपि प्रस
ङ्गः॰ धूमत्वाद्यवच्छिन्नविषयकज्ञानाप्रयोज्यत्वस्य वन्हित्वाद्यवच्छिन्नविधेयतायां वन्ह्या
दाय बाधितत्वादिति वाच्यं॰ पर्वतादिविशेष्यतानिरूपितवन्हित्वाद्यवच्छिन्नविधेयतायै
त्वावच्छेदेनै- विधेयतायां नञभावान्वयबोधोपगमात्॰ यत्र वन्हित्वावच्छिन्नविधेय
तात्वं अन्वयितावच्छेदकं तत्रैव तदवच्छेदेनेतरान्वयः संभवति॰ अत्र च वन्हित्वावच्छिन्नत्वयि
शेषितत्वमवतथेति कथं तदवच्छेदेनाभावान्वय इति तु न त्राह्यं॰ पंचम्याद्यर्थविधेयताय ल
वन्ह्यादौ वन्हित्वाद्यवच्छेदेनान्वयोपगमात् तदवच्छेदेन तद्द्वये चावच्छेदकतद्रूपस्य वन्त्यादि
शेषतांशे धर्मिता[illegible]पारतंत्र्येण प्रकारत्वात्॰ प्रकृते स्वरूपसंबंधरूपवन्हित्वावच्छिन्नत्वेन स
हितस्य विधेयतात्वस्यैवान्वयितावच्छेदकत्वात्॰ वन्ह्यादिपदमेव तदवच्छिन्नविधेयतार
लिज्ञानपरं॰ तदुत्तरमतुबाद्यर्थ[illegible] विशेष्यतारूपसंबंधपर इति॰ प्राचीनमते तु वन्हित्व
चर्वच्छिन्नविधेयतात्वस्यान्वयितावच्छेदकत्वमविवादमेव॰ विधेयतायास्तत्तत्संबंधाव

यो

व्यु॰वा॰
॥८१॥ [illegible]न्वयितावच्छे[illegible]घटत्वाद्यर्थत्वं स्वीकरणीयं। तेनायं जानाति ओदनं [illegible]त्याद्यस्या
दौ वच्यतासंबंधावच्छिन्नायां प्रकृत्यर्थनिरूपितज्ञानविधेयतायां ह्यत्वादि
रूपालिंगज्ञानप्रयोज्यत्वसत्वेपि नावच्छेदकावच्छेदेनाऽभावान्वये योग्यत्वं संबंधावच्छे
दावच्छिन्नावच्छेतात्वरूपान्वयितावच्छेदकावच्छेदेनाभाववत्वबोधात्। एवं ज्ञानप्रयो
ज्यत्वप्रविष्टज्ञानमपि तत्तत्संबंधावच्छिन्नप्रकारताकत्वविशेषितमर्थः। न समवायेन
हेतुत्वपरस्यायं वह्निमान् न धूपान् न धूमादिति प्रयोगस्यानायोग्यता। वह्निविधेयताया
संयोगेन धूमप्रकारज्ञानप्रयोज्यत्वसत्वेपि समवायसंबंधावच्छिन्नतत्प्रकारतानु
लिज्ञानप्रयोज्यतात्वरूपान्वयितावच्छेदकावच्छिन्नाभावस्याबाधात्। संबंधविनि
बघटितं धर्मस्यान्वयितावच्छेदकतया भानमिति यामकं तु तात्पर्यमेव। वह्न्यादिविधे
यतायाश्चासादिघटकीभूताभावादिप्रकारकज्ञानप्रयोज्यत्वेपि पर्वतो वह्निमान् अभावादि
त्यादिर्नप्रयोगः। मुख्यविशेष्यतानिरूपितप्रकारताया एव निवेशनीयत्वादिति दिक्। भे ॥८१॥
न हेतुना कस्मै हेतवे इत्यादौ विभक्तिर्मिहिंतु तावच्छिष्टे हेतुतापौनरुक्त्येन बोधयितुमशक्या
ज्योतिन त्रात्रं हेतुत्वादस्य स्वरूपयोग्यतापरत्वात्। विभक्तेः फलोपधानपरत्वात्। द

उपानुरक्तदंडवाजाति यत्र कार्यविशेषानुपरक्तहेतुतावच्छिष्टकार्यविशेषोपरक्तहेतुताबोधे
ऽनाकांक्षतादिरहाच्च। न चान्वयबोधसंभवेपि हेतुत्वादिप्रयोगवैयर्थ्यं फलोपधायकताबोधे
स्वरूपयोग्यतायाश्च अर्थाल्लाभसंभवादिति वाच्यं। विभक्तेरन्यार्थताया अप्यन्यत्र दृष्टत्वात्।
हेतुतापरत्वानिश्चयार्थतत्प्रयोगात्। सहार्थयोगेपि साहित्यप्रतियोगिवाचकपदात्तृतीया पुत्रे
ग्रंथ ण सहागतः इत्यादौ। अत्र यादिसहत्वाद्यर्थः समभिव्याहृतपदोपस्थापि[illegible]क्रियासमानका
लीनक्रियान्वयित्वं तदन्वयित्वं च समभिव्याहृतक्रियाबोधकपदेन [illegible] क्रियायां याद्दृशा
संबंधः साहित्यान्वयिनि प्रसाध्यते तादृशान्संबंध एव च। स च पुत्रेणेत्यादौ कर्तृत्वं। दध्नास
होदनो भुज्यते इत्यादौ कर्मत्वादिः। स्त्र तीयार्थोपि स एव संबंधः तथा च पुत्रकर्तृकागमनसमा
नकालीनागमनकर्तृत्वदधिकर्मकभोजनसमानकालीनभोजनकर्मत्वादिकं पुरुषौदन
दो तत्र तत्र प्रतीयत इत्युच्यते तथा सहत्वादेनैव तत्तत्क्रियाकर्तृकत्वादिबोधने क्रियापदवै
यर्थ्यं। क्रियान्वयिनि क्रियान्वयबोधस्योद्देश्यतावच्छेदकविधेययोरभेदेन जनसाकांक्षतया
ऽसंभवश्च। न च तत्र क्रियासमानकालीनत्वमात्रं सहत्वाद्यर्थः तस्य क्रियापदोपस्थापित

व्यु॰वा॰
॥६२॥

क्रियायामेवान्वयइतिक्रियापदसाहित्यसहशब्दादेवोक्तविशेष्यकार्थलाभइतिवाच्यं॰ एवं
सतिपुत्रेणसहागतइत्यादौसहशब्दार्थस्यक्रियापदार्थान्वयेऽन्वयेनान्यसापेक्षतयातेनस
हपुत्रपदस्यसमासासंभवेसपुत्रइत्यादिप्रयोगानुपपत्तेः॰ नह्यत्रसमासेसहार्थस्यप्राधा
न्ययेनान्यसापेक्षत्वेपिसमासासंभवेत्॰ किंतुबहुव्रीहित्वादन्यपदार्थप्राधान्यमेवेतिचेन्नः
समभिव्याहृतपदोपस्थाप्यक्रियाकालएवसहशब्दार्थः तस्यचक्रियान्वयानिनामार्थतया
न्वयः॰ तादृशकालविशेषेणनानार्थक्रियान्वयेचक्रियायामपितादृशकालावच्छिन्नत्वे
भासतेउद्देश्यतावच्छेदकावच्छेदेनविधेयान्वयस्यव्युत्पत्तिसिद्धत्वात्॰ अतःक्रियाद्वयस
मानकालीनत्वलाभइतिसामंजस्यात्॰ अथवाआगमनसमानकालीनागमनादिकर्मे
वसहशब्दार्थःतस्यकर्तृत्वादिसंबंधेनपुरुषादावन्वयः॰ तादृशसंबंधेनतादृशविशिष्टचाग
तआगच्छतीत्यादिपदोपस्थाप्यागमनकर्तृत्वादीनामन्वयेनव्युत्पत्तिविरोधः॰ विधेय
स्योद्देश्यतावच्छेदकप्रकाराभेदविरहात्॰ नचसहशब्दार्थान्वयबलादेवतत्क्रियाकर्तृत्व त्वाव-
स्यपुरुषादौलाभप्रकारतयापिक्रियापदेनतत्प्रतिपादनमफलमितितत्प्रयोगोपपत्तिः ॥६२॥

तिवाच्यं॰ समभिव्याहृतपदेनतत्क्रियायाअनुपस्थापनेसहशब्देनापितत्क्रियाघटितस
हित्वस्यशक्यस्यबोधनेनसंभवतीतिक्रियापदप्रयोगस्यावश्यकत्वात्॰ सहशब्दार्थक्रिय
याःकर्तृत्वादिसंबंधेननामार्थेन्वयश्चनव्युत्पत्तिविरुद्धः॰ सहशब्दस्याधातुत्वात् निपात
त्वाच्च॰ नचप्रासोष्टवत्सानुप्रमुदारचेष्टमेकासुमित्रासहलक्ष्मणेनेत्यादौचात्ररघुप्रसवेलक्ष्म
णप्रसवयोःसमानकालीनत्वाभावात्क्रियाद्वयसमानकालीनतायाःसहशब्दार्थत्वासं
भवइतिवाच्यं॰ तत्रापिस्थूलकालघटितसमानकालीनत्वसत्त्वात्॰ नचकालत्वेनैवकाल
स्यपदार्थत्वेतिभातिपुत्रागमनपूर्वमागतेपिआगतोयंपुत्रेणसहेतिसहेतिप्रयोगानु
पपत्तिः॰ पुत्रागमनाधिकरणस्थूलकालस्यागमनकर्तृत्वसत्त्वेनान्वयितावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकसाहित्याभावबाधादितिवाच्यं॰ तत्रसत्त्वेनैवकालस्यसहशब्दा
र्थत्वंभावनीयत्वात्॰ एवंयत्रैककालेपिभिन्नस्थलेभुंजानमधिकृत्यसहनभुंक्तेइतिप्रयुज्य
नतत्रैकस्थलरूपजेनाधारेपिसहशब्दार्थत्वंभावनीयः॰ अतएवालापाद्गात्रसंस्पर्शान्नि:
[illegible]सहभोजनादिसाद्गनापतितभोजनसमानकालीनभोजनमात्रस्यपापजनकत्वं

व्यु॰धा॰
॥११७॥

तिक [illegible] प्रकृत्यर्थस्यक्र [illegible] विशेषणतया ऽपरस्य तदवच्छेदकतयाभानस्यान्वयुत्पन्नत्वात्॰ एवं क्वचित्
क्षितिपयसीरसवतीरसादौ क्षितिजलोभयत्वाद्यवच्छिन्नाभिन्नेरसवदादिपदार्थत्वबोधो न संभवति
रसादिमत्पि प्रत्येकमुभयत्वावच्छिन्नभेदसत्वात्॰ नापि प्रत्येकभेदावच्छिन्नेतथैव बाधात्॰ नापि
कभेदघटिताच्छापरभेदावच्छिन्ने एकपदस्य तादृशाभेदावच्छिन्नलक्षणायां परपदार्थे रसवदाद्य
न्वयरूपविधेयान्वयात्॰ इदं च घटैकपदार्थमात्रे विधेयान्वयस्याव्युत्पन्नत्वात्॰ नापि पदार्थो
लक्षणायां तद्भिन्नोपस्थितौ अभेदेनैकत्र भिन्नान्विते ऽपरभिन्ने॰ तथापि पदार्थद्वयविधेयान्व
यानुपपादनात्॰ इदं समस्यमानपदार्थानामभेदान्वयादिस्थले चिन्त्यं॰ यत्तु नराणां क्षत्रियः शू
र इत्यादौ भूरादावन्वयभेदः षष्ठ्यर्थः नरादिभूरस्त्वाद्यवच्छेदेन च क्षत्रियाद्यभेदान्वयः॰ एवं च द
त्रियोन्यनेरऽर्थतः शौर्यप्रच्छेदली भर्ति॰ तद्सत्तमसत्॰ नराणां क्षत्रियेत्यर्थमिति दोषक्ष
याणां कर्णः प्रचुरं ददातीत्यादौ व्यानिर्वाहात्॰ इदं तुलत्वं॰ निर्धारणविभक्ते र्व्याकरणत्वमेवार्थः
व्याप्यत्वं चाभेदान्वयि विधेयस्य समभिव्याहारस्थले ऽन्योन्याभावप्रतियोगित्वं भेदान्वयितस्य व्यु॰
ले वा संताभावप्रतियोगित्वं तस्य चाविधेयतावच्छेदकावच्छेदेनान्वयः॰ अतो नद्वित्वाद्यवच्छि ॥११७॥
न्नाभावमादायातिप्रसंगः॰ अभावे च प्रकृत्यर्थस्य नरादेः क्षत्रियत्वादिरूपादेश्यतावच्छेदको

वच्छिन्नभेदवन्निष्ठप्रकृत्यर्थतावच्छेदकनरत्वाद्व्यापकाधिकरणतानिरूपिताधेयतासंबंधे
नान्वयः॰ एतावतैव आम्रादिरूपविशेषणं भूत्यप्रकृत्यर्थनरादिसामान्यव्याप्तेर्विधेयधर्म
लाभः॰ द्रव्याणां क्षितिपयसीरसवतीत्यादौ भेदद्वयादिघटितकृत्यत्वादिव्यापकतैव संबंधः॰ वि
धेयस्य भूरत्वादेः निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकनरत्वादवच्छिन्नतादृशत्वादिवै
यसंबंधतयाभासते॰ अतो नराणां राक्षसः शूरः इत्यादौ नोपपत्तिः॰ अन्यत्स्वयमूह्यं॰ आधारस
सम्यग् आधेयत्वमर्थः॰ तस्य क्रियायामन्वयः॰ आधाराधेयभावश्च संयोगादिरूपसंबंधो
ऽन्यः॰ कुंडादिसंयोगिनो बदरादेरपि कुंडाधारताप्रसंगात्॰ अपितु पदार्थांतरमेव॰ स्वत्वसंबं
धावच्छिन्नः संयोगेनाधिकरणं॰ समवायेनाधिकरणमित्यादिव्यवहारात्॰ अ
वोक्तातिप्रसंगपि यासंयोगेनाधारत्वमेवातिरिक्तं॰ समवायादिसंबंधावच्छिन्नं च समवा
यादिरूपमेव॰ न च समवायस्यापि संबंधत्वेन तद्धितया रूपादेरपि घटाद्यधिकरणता
प्रसंगः॰ तथा सति तुल्यमत्वयाऽधिकरणत्वस्यापि द्विष्ठतयातादृशातिप्रसंगस्य दुर्वार
[illegible] त्वा धारतया आधारे ऽनुयोगित्वं संबंधः॰ आधेये च प्रतियोगित्वमिति संबंधैवल
[illegible] न्नातिप्रसंगः॰ आधारत्वानुयोगितायाएवाधारव्यवहारप्रयोजकत्वादित्युच्य

· व्यु·वा·
॥१२५॥

अनन्तरं कृतः सन्यः लिच प्रभृतयः प्रत्ययाः केचित्कृत्यर्थान्वितसाधकतमत्वं प्रवदन्ते· अर्था
तरमन्तः ... धानाश्च केचिदाकांक्षानिर्वाहकतया प्रकृतिभिः स्वीयार्थबोधनएवोपकुर्वते·
तत्र लङादिदशलकारानंतरं लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रेण कर्तृकर्मभावेषु नुशि
ष्टानां कर्तृत्वसामान्यमर्थः· तावन्मात्राभिधानेनैव प्रथमांतपदोपस्थाप्यतदन्वयप्रकारतावि
शिष्टस्य कर्तुर्विधाननिर्वाहात्· लकारस्य तद्बोधकतया न लः कर्मणीति सूत्रार्थविरोधः
बोधकतायाएव तत्र सप्तम्यर्थत्वात्· नतु वाचकतायाः गौरवेण विशिष्टधर्मिशक्तिकल्पने
र्बाधात्· मैत्रः पचतीत्यादौ लकारे प्रथमांतपदसामानाधिकरण्यप्रवादस्याभेदेनतद
र्थान्वितस्वार्थबोधपरत्वाभावेपि कथंचिदुपपादनसंभवात्· तृतीयायाः साधुत्वमि
यामकं लकारादिनाकर्तुरनभिधानमपि कर्तृत्वविशिष्टबोधनमेव नतु विशिष्टशक्त्या
बोधनपर्यंतमतो विशिष्टस्य लकारवाच्यत्वेपि चैत्रः पचतीत्यादौ न तृतीयापत्तिः अ
न्यथा लेनाविशिष्टबोधात्· चैत्रः पक्व इत्यादौ कृत्प्रत्ययस्य धर्मिशक्त्या कावधिनक्षतिः
तत्त्वधीनाविशिष्टबोधसाधारणबोधस्यैवानभिधानपदार्थप्रतियोगित्वात्· अनभि ॥ न्याय· ॥१२५॥
हितकर्तरित्ति तृतीयेत्यनुशासनेपि समभ्यर्थबोधकत्वमेव· तथा च चैत्रेण पच्यते इत्या

दौ तृतीयार्थकर्तृत्वस्य प्रकृत्यर्थविशेष्यतयैव भानात् कर्तृत्वविशिष्टधर्मिबोधकत्वमिति सू
त्राविरोधः· यद्यपि तत्र कर्त्राख्यपदं धर्मिपरं· तथापि समभिव्याहृतलकाराद्यनभिहितं क
र्तृत्वं तृतीयार्थ इति सूत्रार्थः चैत्रेण पच्यतइत्यादौ कर्तृत्वस्य तृतीयामात्रार्थत्वात् लकारेत
दनभिधानं सुघटमेवेति मंतव्यम्· तथा च तत्रानभिधानशब्दार्थोभिव तैव वक्तव्यः नेतावदत्रा
चकत्वं तदर्थः लकारसामान्यस्यैव कर्तृत्वशक्तत्वेनानुक्तिसंभवात्· कर्तरि यकोसाधुत्वा
देव चैत्रः पच्यतइत्यादिप्रयोगवारणात्· यगाद्यनुत्तरत्वस्य कर्तृत्वशक्ततावच्छेदककोटि
प्रविवेशनात्· तत्र तान्निवेशोपच्यंते माषाः भिद्यते कुसूलं लूयंते केदाराः इत्यादौ कर्मकर्तुर्मा
षकुसूलकेदारादेः कर्तृत्वबोधानुपपत्तिः नचतत्र स्वयमेवेत्यस्याध्याहारेणान्वय स्वयं
पदोत्तरतृतीयया कर्तृत्वं बोध्यते न तु लकारेणेति वाच्यं· स्वयमित्यादिपदाध्याहारं विना
पि तत्र कर्तृत्वबोधाभ्युपगमात्· तत्र लकारेण कर्तृत्वाबोधने कर्मकर्तुः कर्मवत्कर्मणा तुल्य
क्रियइति देशवैयर्थ्यापत्तेः लकारस्य कर्मत्वबोधकतयैव यगात्मनेपदचिण्चिण्वदि
धरूपादि ... फलानिर्वाहात्· नच कर्मकर्तरि लकाराधीनकर्मत्वबोधस्यावश्यकता· यक्तु
गसोः कर्तुः कर्मत्वातिदेशो चैत्रः स्वयं पच्यति हंतीत्यादावपि यगात्मनेपदादिप्रसंगात्· लका

व्यु॰ वा॰ कर्तृत्वस्य विशेष्यताया: प्रातिपदिकार्थेऽविवक्षितत्वादित्याशयात्· अथ धात्वर्थपरतया प्रातिपदिका
॥२२७॥ र्थविशेष्यतया कर्तरि विवक्षिते तदुत्तरं तृतीयेति पर्यवसितं· अत एव चैत्रः पचतीत्यादौ आख्या
तार्थत्वेन कर्तृत्वबोधनात् उक्तार्थानामप्रयोग इति न्यायात् तृतीयापत्तिविरहात्· प्रातिपदि
कार्थान्वयितया कर्तृत्वविवक्षायामिदमेव समर्थकं प्रातिपदिकार्थान्वयितया कर्तृत्वविव
क्षायामिदमेव समर्थ विशेष्यतयाऽन्वयित्वपर्यन्तानि वेदितानि तान्यत्रांशकं· संख्यातिरिक्तसुब
र्थस्य प्रकृत्यर्थविशेष्यतयैवान्वय इति व्युत्पत्तिसूचकत्वेन विशेष्यतयाऽन्वयित्वप
र्यन्तस्याव्यावर्तकत्वात्· यथाश्रुतसूत्रानुरोधेन कर्तरि कर्मणि कारकविभक्त्योः शक्तिः यदि
भिन्नैर्वैयाकरणैरपि प्रातिपदिकार्थविशेष्यतया कर्तरि विवक्षिते तृतीयेत्येव सूत्रार्थो वाच्यः अन्य
था चैत्रेण पच्यते तण्डुल इत्यादौ कर्तुरनभिधानस्योक्तक्रमेण दुर्घटत्वापत्तेरिति सकलमधिकेन· अन्यथा
नभिहितकर्तरि तृतीयेत्यस्यार्थकत्वे चैत्रादिकर्तृत्वविशेषितपाकादिविवक्षया चैत्रेण
पचतीत्यादिप्रयोगापत्तिः· न च परस्मैपदार्थकर्तृत्वान्वयिधात्वर्थविशेष्यविरहात्तन्न तथा प्रयोगः। व्यु॰ वा॰
विशेष्यतयापि कर्तृत्वबोधसंभवात्· चैत्रमैत्रीयकर्तृकपाकस्थले चैत्रे कर्तृकपाककर्त्ता ॥२२७॥

मैत्र इत्यन्वयतात्पर्येण पचति मैत्र इति प्रयोगस्य दुर्वारत्वाच्च· न च कर्तृत्वातिरिक्तविशेषणा
तापन्नायां कर्तृत्वेऽपि विशेषणतानापन्नायां च क्रियायामेव तृतीयार्थकर्तृत्वान्वय इति व्युत्पन्न
इति वाच्यं· चैत्रेण पाचयति मैत्र इत्यादौ तदर्थकर्तृत्वविशेषणतापन्ने पाकादौ चैत्रादिकर्तृ
कत्वान्वयेन तादृशव्युत्पत्तेरसंभवः· न च कृदर्थकर्तृत्वविशेषणतानापन्नक्रियाविशेष
णतया कर्तृत्वबोधकत्वं सुपां व्युत्पन्नमिति न कश्चिद्दोष इति वाच्यं· उक्तस्थले चैत्रेण पक्व
वान्मैत्र इति प्रयोगापत्तेः· मैवं· आश्रयतातादृशविशेष्यतापन्नकर्तृत्वविशेषणतानापन्नक्रि
यायां तृतीयार्थकर्तृत्वान्वयोत्पत्तौ नाकिंचिद्बाधकं· चैत्रेण पचति मैत्र इत्यादयश्च न प्रयोगाः· त
दाश्रयप्रकृतेर्विशेषणतया तद्विशेषणतापन्नक्रियायां तृतीयाया: कर्तृत्वबोधनासंभवात्·
कृतिविशेष्यकबोधाभिप्रायेण चैत्रेण पचतीति धारणया आश्रयविशेषणत्वमपेक्ष्याश्रयाति
रिक्तविशेषणत्वं निवेशितं· अनभिहिते कर्तरीत्यस्यापि निरुक्तक्रियाविशेषणतया प्रातिप
दिकार्थान्वयिकर्तृत्वविवक्षायां तदुत्तरं तृतीया भवतीत्येवार्थ इति दिक्· कर्तृत्वं च चैत्रः पच
तीत्यादौ क्रियानुकूला कृतिरेव· तस्याश्च यत्नानुकूलकृतित्वेन कृतित्वेन वा आख्यातवाच्यता·
रथो गच्छतीत्यादौ पचतीत्यादौ च क्रियानुकूलव्यापाररूपैककर्तृत्वेन निरूढलक्षणा· कृतित्व

व्यु॰ वा॰
॥१३१॥

…तोपगमासंभवात्· तादृशसंबंधस्याभावप्रतियोगितावच्छेदकत्वे
… …जन्यप्रत्ययेतानाद्यधिकरणकतादृशसंबंधावच्छिन्नघटाभावस्या
सानेनघटइत्यादिवाक्यजन्यबोधे ज्ञानं नवेत्यादिसंशयनिरासायकदाचिज्ज्ञानेनघटइत्यादिकमपेक्ष
प्युपगाहनसंभवात् घटविज्ञानं नवेत्यादि… अतएवानुकूलकृतिमत्त्वादिरूपकर्तृत्वादेरपि चैत्रः पचतीत्यादौ प्रकारतामतिकृता
ज्येत· अतएवानुकूलकृतिमत्त्वादिरूपकर्तृत्वादेरपि … तादृशसंबंधस्य कृत
पिस्वीक्रियते न तु संसर्गता· नपचतीत्यादावन्वयबोधानिर्वाहात्· तादृशसंबंधस्य कृत
नियामकतया अभावप्रतियोगितानवच्छेदकत्वेन तत्संबंधावच्छिन्नाक्रियाविरहात्प्रसक्तस्य
तत्रोपगमासंभवात्· एवं चैत्रेण लज्जायत इत्यादौ आधेयत्वस्य तृतीयया अभिधाने प्रातिप
दिकार्थमात्रविवक्षयाद्वितीयानुशासनप्रथमैव स्यात्· आनाति चैत्र इत्यादौ आख्यातेन कर्तृ
त्वाविवक्षणे धात्वर्थरूपभावमात्रपरतया परस्मैपदस्यादिकारणस्य चासाधुतापत्तिः। आ
धकर्मतो हि आत्मनेपदविधायकानुशासनविषयत्वात्· कर्तरीत्यधिकारीयश्यादिभ्यः। आ
रसनुशासनविषयत्वाच्चेति तत्राख्यातस्य कर्तृत्वान्वयबोधकतायुक्तस्तु न साधीयसी· इति
राविशेषणतया क्रियाबोधपरत्वरूपभावविवक्षायाम् आत्मनेपदानुशासनविषयतोप
गमाद्युक्तस्थले परस्मैपदसाधुतायास्तादृशाभावविवक्षादिविरहस्य भाष्यानुशासनसंनिविष

गुरुवा॰
॥१३१॥

यत्वोपगमेन स्नादि विकरणस्य साधुतायाश्च निर्वाहसंभवात्· पचन् पचतीत्यादावुद्देश्यतावच्छे
दकाविधेयाभेदेन जानन् जानातीत्यादेर्निराकाङ्क्षतानिर्वाहाय्यापि जानातीत्यादावाख्यातस्याश्रय
तार्थकतोपगम आवश्यकः· अथाकृदन्तप्रतिपाद्यतावच्छेदकस्य ज्ञानादिरूपाविधेयाभिन्नतया निरा
काङ्क्षताविरहेण तथाप्रयोगापत्तेः· एतेन तत्राश्रयतायाः प्रकारतोपगमे जानाति चैत्र इत्यादिवा
क्यस्यानघटितत्वाद्सामग्र्याभिन्नविषयकप्रत्यक्षादिप्रतिबंधकतायामाख्यातजन्याश्रयत्वोप
स्थित्यादिरूपाधिकरणानां निवेशो मोरवेणाश्रयतायाः संसर्गमर्यादोचितमित्यादिकमनुपादेयं·
नश्यतीत्यादौ प्रतियोगित्वरूपकर्तृत्वमाख्यातार्थः· तादृशसंबंधस्याभावप्रतियोगितानव
च्छेदकत्वेन नश्यतीत्यादौ नञ्प्रतियोगित्वाभावबोधस्यैव सर्वसिद्धतया न संसर्गतासंभ
वः। अथाख्यातस्य कर्तृत्वशक्ततावच्छेदकं रूपं दुर्वचं न च तिङ्त्वं तथा तिप्तसादिसाधारण
ङ्त्वस्य दुर्वचत्वात्· न च पाणिनीयकं संकेतसंबंधेन तिङ्पदत्वमेव तिङ्त्वं· तिवाद्युच्चारण
सुलभपदसंकेतग्राहकं चादिरूपरसेनेतिसूत्रमेव· तत्संकेतमविदुषामनधीतपाणिनीयतं
त्राणां तद्वादिनाशक्तिभ्रमादेव शाब्दबोधइति वाच्यं· एवं सति घटादिवाचकघटादिपदेष्व
पि … …रूपावच्छेदपालीयसंकेतसंभवेन तुल्ययुक्त्या तत्रापि तच्छूद्रस्यैवात्रावच्छे

त

व्यु० वा० तावच्छेदकतापत्तेरिति वाच्यं तु प्रतीतिर्नास्ति धूपसंकेतवत् तत्र शक्यांतसंकेतस्यापि अन्यपुर
॥१३२॥ षीयस्य संभवात् तत्तच्छब्देभ्यः स्थानिनः स्मरणात्तत एवार्थोपस्थितिः आदेशादेशि
भावभावद्रुषां तु तत्त्वादिना शक्तिभ्रमादेवार्थोपस्थितिः एवमतिवादे लादेशत्वज्ञानेना
स्तिश्रुतत्याकाराद्यर्थोपस्थितिः तत्र पच्यतीतिवाक्याच्छाब्दबोधवारणाय पचॄ तीस्य
धातुपूर्वीज्ञानजन्यबोधोतिवादे लादेशत्वज्ञानमपि हेतुः नचोक्तस्थले धातुसाकां
क्षत्वेनैवसमूहालंबनशाब्दबोधस्तदसत्वेच ताह्याकारणाभावादेवनापत्तिरितिवाच्यं। पच
तीत्यादौतिवादिनालकारस्योपस्थापनेपि तत्तद्धातुसाकांक्षितयातत्स्मारकाभावेनश
च्दबोधानुपपत्तिः लकारे धातुसाकांक्षत्वग्रहस्य तत्वाद्यहेतुत्वासंभवात् नाहितत्त
द्धातुसाकांक्षत्वेनलस्तिवादिस्थानीयतत्तद्रूपावच्छिन्नमेवतियादिः स्मारयेत् अपि
तुलत्वेनैवतथात्वमिति। एवं तत्तद्धातुपदाव्यवहितोत्तरत्वरूपतत्साकांक्षत्वेनयेनपुं व्यु० ॥१३२॥
सा लकारः श्रुतस्तस्य तेनरूपेण तत्स्मरणाभवइति अत्रेदं चिंत्यते। लकारतिवाद्योर
नतिप्रसक्तस्थान्यादेशभावस्यदुर्वचत्वात्तिवादिस्मारितलकारस्यवाचकत्वं नविचा

रसहं तिवादेरेव यत्र वाचकतायाग्रहस्तदनुरोधेन पचतीत्याद्यानुपूर्वीज्ञानं ... तिवादि
जन्योपस्थितिसहकारित्वशाब्दबोधोपधायकताकल्पनस्यावश्यकतया लकारज
न्योपस्थितिसहकृततादृशानुपूर्वीज्ञानतिवादिधर्मिकालादेशत्वज्ञानतिवादिध
र्मिकालादेशत्वज्ञानघटितसामग्र्यंतरकल्पने गौरवेणान्याय्यत्वात्तिवादेरेव वाचकताग्र
ह्येणशक्तिकल्पनायाऔचित्यं चेति॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥ शुभमस्तु॥छ॥छ॥

যু০৭৩
।।৭৩২।

গ দু. বাংলা

গ্রা৭৩
।।৭৩২।